### सप्तमः पाठः

# प्राचीनाः विश्वविद्यालयाः

## (अव्यय-प्रयोग)

(प्राचीन भारत में विभिन्न विधाओं के अध्ययन-अध्यापन के लिए विश्वविद्यालयों की कल्पना हो चुकी थी। राजाओं ने अनेक ग्रामों की आमदनी इन विश्वविद्यालयों के संचालन के लिए दानपत्र द्वारा निर्धारित कर दी थी। जिस समय यहाँ के प्रसिद्ध विश्वविद्यालय अपने स्वर्णयुग में थे, विदेशों में एकाध स्थान पर ही ऐसे व्यवस्थित शिक्षालय थे। तक्षशिला, नालन्दा एवं विक्रमशिला - ये तीन विश्वविद्यालय प्राचीन भारत में अनेक शास्त्रों के अध्ययन के लिए विदेशी छात्रों एवं विद्वानों को भी आकृष्ट करते थे। प्रस्तुत पाठ में इनका संक्षिप्त परिचय दिया गया है।)



बहूनां शास्त्राणां ज्ञानविषयाणां च यत्र शिक्षा दीयते तस्यैव अभिधानं विश्वविद्यालय इति। तत्र सुयोग्याः अध्यापकाः निष्पक्षभावेन छात्रान् पाठयन्ति। छात्राश्च परीक्षानन्तरमेव तत्र प्रवेशं लभन्ते। विश्वविद्यालयाः ज्ञानकेन्द्राणि भवन्ति। ज्ञानस्य विकासोऽपि तत्र निरन्तरं जायते।

प्राचीने भारते तक्षशिलायां प्रसिद्धः विश्वविद्यालयः षष्ठशतके ईस्वीपूर्वमेव



Developed by: ABSOL www.absol.in

अवर्तत । बौद्धसाहित्ये तक्षशिलाया: भूयो भूय: उल्लेखो वर्तते । अयं विश्वविद्यालय: गान्धारदेशे आसीत् । तस्य देशस्य तक्षशिलायां राजधानी बभूव । सम्प्रति तक्षशिलाया: भग्नावशेषा: पाकिस्तानदेशे रावलपिण्डीसमीपे सन्ति । अत्र धनुर्वेदस्य, आयुर्वेदस्य तथा अन्यासां विद्यानामपि शिक्षणम् आसीत् । अत्र बुद्धकालिक: वैद्य: जीवक:, वैयाकरण: पाणिनि:, मौर्यराज्यस्य संस्थापक: चन्द्रगुप्त:, कूटनीतिज्ञ: चाणक्य: इत्यादय: प्रसिद्धा: छात्रा: अधीतवन्त: ।



नालन्दा विश्वविद्यालय: विहारे एव आसीत् । अस्य भग्नावशेषा: विशालक्षेत्रे अवस्थिता: सन्ति । कुमारगुप्तेन पञ्चमशतके खीष्टाब्दे अस्य स्थापना कृता । प्राय: सप्तशतानि वर्षाणि अयम् अवस्थित: । बर्बराणाम् आक्रमणेन अस्य विध्वंसो जात: । अत्रानेके चीनयात्रिका: बहूनि वर्षाणि अधीतवन्त: । तेषु हुएनसांग: प्रधान: । तेन विश्वविद्यालयस्य विस्तृतं विवरणं दत्तम् । अत्र दशसहस्राणि छात्रा: एकसहस्रमध्यापका: निवसन्ति स्म । यद्यपि बौद्धधर्मे अस्य अभिनिवेश: आसीत् किन्तु बहूनां शास्त्राणामपि वर्णनं स करोति । तानि अत्र पाठ्यन्ते स्म । अस्य

विश्वविद्यालयस्य त्रयः महान्तः पुस्तकालयाः सप्तसु तलेषु अविद्यन्त । भग्नावशेषेण विश्वविद्यालयस्य विशालता ज्ञायते ।

विहारराज्ये एव पालवंशीयेन राज्ञा धर्मपालेन अष्टम-शतके संस्थापितः विक्रमशिला-विश्वविद्यालयः अपि अनेकशास्त्राणां शिक्षणाय प्रसिद्धः आसीत् । अत्रापि नालन्दायामिव चीनतिब्बतादि-देशेभ्यः आगताः छात्राः अधीयते स्म । केचन अध्यापका अपि उभाभ्यां विद्यापीठाभ्यां तिब्बते चीने वा निमन्त्रिताः गच्छन्ति स्म । अस्यापि विक्रमशिलाविश्वविद्यालयस्य विनाशः नालन्दया सार्धं बर्बरैः कृतः धनलुण्ठनाशया । उभौ विश्वविद्यालयौ विहारस्य गौरवभूतौ स्तः ।

**शब्दार्थ :**

**बहूनाम्** - बहुत का, अनेक का

**शास्त्राणाम्** - शास्त्रों का

**ज्ञानविषयाणाम्** - ज्ञान के विषयों का

**दीयते** - दिया जाता है

**तस्यैव** (तस्य + एव) - उसी का

**अभिधानम्** - नाम

**निष्पक्षभावेन** - निष्पक्ष भाव से, बिना किसी का पक्ष लिए

**परीक्षानन्तरमेव** - परीक्षा के बाद ही

**लभन्ते** - पाते हैं

**विकासोऽपि** - विकास भी

**निरन्तरम्** - हमेशा

**जायते** - होता है

**प्राचीने** – प्राचीन में, पुराने में

**तक्षशिलायाम्** – तक्षशिला में

**षष्ठशतके** – छठी शताब्दी में

**ईस्वीपूर्वमेव** – ईस्वी पूर्व ही

**अवर्तत** – हुआ था

**बौद्धसाहित्ये** – बौद्ध साहित्य में

**तक्षशिलायाः** – तक्षशिला का/ की

**भूयः भूयः** – बार–बार

**गान्धारदेशे** – गान्धार में (वर्तमान पाकिस्तान में)

**बभूव** – हुआ

**सम्प्रति** – इस समय (साम्प्रतम् = आजकल)

**भग्नावशेषः** – खण्डहर

**रावलपिण्डीसमीपे** – रावलपिण्डी के समीप में

**अन्यासाम्** – दूसरी का/ के/ की

**विद्यानामपि** (विद्यानाम् + अपि) –विद्याओं का, विषयों का भी

**बुद्धकालिकः** – बुद्धकालीन, बुद्ध के समय वाला

**वैयाकरणः** – व्याकरण के विद्वान

**मौर्यराज्यस्य** – मौर्य राज्य का, के, की

**कूटनीतिज्ञः** – कूटनीति जाननेवाला

| | | |
|---|---|---|
| **इत्यादयः** | – | इत्यादि |
| **अधीतवन्तः** | – | अध्ययन करते थे |
| **अवस्थिता** | – | स्थित, रही हुई |
| **पञ्चमशतके** | – | पांचवीं शताब्दी में |
| **खीष्टाब्दे** | – | ईसवी में |
| **सप्तशतानि** | – | सात सौ |
| **वर्षाणि** | – | वर्ष (बहुवचन) |
| **बर्बराणाम्** | – | बर्बरों के, क्रूरों के |
| **विध्वंसः** | – | नाश |
| **अत्रानेके** | – | यहाँ अनेक |
| **चीनयात्रिकाः** | – | चीनी यात्री |
| **दत्तम्** | – | दिया गया |
| **दशसहस्राणि** | – | दस हजार |
| **एकसहस्रमध्यापकाः** | – | एक हजार अध्यापक |
| **निवसन्ति स्म** | – | रहते थे |
| **अभिनिवेशः** | – | लगाव, रुचि |
| **शास्त्राणामपि** | – | शास्त्रों का भी |
| **तानि** | – | वे (नपुंसकलिङ्ग) |
| **पाठ्यन्ते** | – | पढ़ाये जाते हैं |

| | | |
|---|---|---|
| **त्रयः** | – | तीन (पुँल्लिङ्ग) तिस्रः (स्त्री.) तीन, त्रीणि (नपुं.) तीन |
| **अविद्यन्त** | – | मौजूद थे |
| **विशालता** | – | बड़ा आकार का भाव, भव्यता |
| **ज्ञायते** | – | जाना जाता है |
| **अत्रापि** | – | यहाँ भी |
| **नालन्दायाम्** | – | नालंदा में |
| **आगताः** | – | आये हुए |
| **अधीयते स्म** | – | अध्ययन करते थे |
| **केचन** | – | कोई, कुछ (पुँल्लिङ्ग) |
| **उभाभ्याम्** | – | दोनों से (अपादान कारक) |
| **विद्यापीठाभ्याम्** | – | विद्यापीठों से (अपादान कारक) |
| **अस्यापि** | – | इसका भी |
| **सार्धम्** | – | साथ |
| **धनलुण्ठनाशया** (धनलुण्ठन + आशया) | – | धन को लूटने की आशा से |

## व्याकरणम्

### संधि-विच्छेदः / पद-विच्छेदः

| | | | |
|---|---|---|---|
| तस्यैव | – | तस्य + एव | (वृद्धि-सन्धिः) |
| छात्राश्च | – | छात्राः + च | (विसर्ग-सन्धिः) |
| परीक्षानन्तरमेव | – | परीक्षा + अनन्तरम् + एव | (दीर्घ-सन्धिः) |
| विकासोऽपि | – | विकासः + अपि | (विसर्ग-सन्धिः) |

| | | | |
|---|---|---|---|
| ईस्वीपूर्वमेव | - | ईस्वीपूर्वम् + एव | |
| भग्नावशेषाः | - | भग्न + अवशेषाः | (दीर्घ - सन्धिः) |
| विद्यानामपि | - | विद्यानाम् + अपि | |
| इत्यादयः | - | इति + आदयः | (यण् - सन्धिः) |
| अत्रानेके | - | अत्र + अनेके | (दीर्घ-सन्धिः) |
| शास्त्राणामपि | - | शास्त्राणाम् + अपि | |
| नालन्दायामिव | - | नालन्दायाम् + इव | |
| अत्रापि | - | अत्र + अपि | (दीर्घ-सन्धिः) |
| अस्यापि | - | अस्य + अपि | (दीर्घ-सन्धिः) |
| यद्यपि | - | यदि + अपि | (यण् - सन्धिः) |

## प्रकृति-प्रत्यय-विभागः

| | | |
|---|---|---|
| दीयते | - | √दा + यक्, लट्लकारः,प्रथमपुरुषः,एकवचनम् (कर्मवाच्यम्) |
| पाठयन्ति | - | √पठ् + णिच्, लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| लभन्ते | - | √लभ् + लट्लकारः, प्रथमपुरुषः, बहुवचनम् (आत्मनेपदी) |
| भवन्ति | - | √भू लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| जायते | - | √जन् लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| आसीत् | - | √अस् लङ्लकारः, प्रथमपुरुषः, एकवचनम् |
| बभूव | - | √भू लिट्लकारः, प्रथमपुरुषः, एकवचनम् |
| सन्ति | - | √अस् लट्लकारः, प्रथमपुरुषः, बहुवचनम् |

| | | |
|---|---|---|
| अधीतवन्तः | – | अधि + $\sqrt{\text{इङ्}}$ + क्तवतु, पुंल्लिङ्गम्, बहुवचनम् |
| कृता | – | $\sqrt{\text{कृ}}$ + क्त, स्त्रीलिङ्गम्, एकवचनम् |
| अवस्थिताः | – | अव + $\sqrt{\text{स्था}}$ + क्त, पुंल्लिङ्गम्, बहुवचनम् |
| जातः | – | $\sqrt{\text{जन्}}$ + क्त, पुंल्लिङ्गम्, एकवचनम् |
| दत्तम् | – | $\sqrt{\text{दा}}$ + क्त नपुंसकलिङ्गम्, एकवचनम् |
| निवसन्ति | – | नि + $\sqrt{\text{वस्}}$ लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| करोति | – | $\sqrt{\text{कृ}}$ लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| अविद्यन्त | – | $\sqrt{\text{विद्}}$ (सत्तायाम्), लङ्लकारः, प्रथमपुरुषः, बहुवचनम् |
| ज्ञायते | – | $\sqrt{\text{ज्ञा}}$ यक्(कर्मवाच्य),लट्लकारः,प्रथमपुरुषः, एकवचनम् |
| आगताः | – | आ + $\sqrt{\text{गम्}}$ + क्त, पुंल्लिङ्गम्, बहुवचनम् |
| अधीयन्ते | – | अधि + $\sqrt{\text{इङ्}}$ लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| गच्छन्ति | – | $\sqrt{\text{गम्}}$ + लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| कृतः | – | $\sqrt{\text{कृ}}$ + क्त, पुंल्लिङ्गम्, एकवचनम् |
| स्तः | – | $\sqrt{\text{अस्}}$ लट्लकारः, प्रथमपुरुषः, द्विवचनम् |

## अभ्यासः

### मौखिकः

1. **अधोलिखितानां पदानाम् उच्चारणं कुरुत –**

   शास्त्राणाम्, तस्यैव, निष्पक्षभावेन, परीक्षानन्तरमेव, दशसहस्राणि, भग्नावशेषेण, धनलुण्ठनाशया, गौरवभूतौ ।

2. **अधोलिखितानां पदानाम् अर्थं वदत –**

   इति, यत्र, जायते, भूयोभूयः, अधीतवन्तः, भग्नावशेषाः, पञ्चमशतके, खीष्टाब्दे, बर्बरैः, उभौ

## लिखितः

### 3. निम्नलिखितानां प्रश्नानाम् उत्तरम् एकेन पदेन लिखत –

(क) तक्षशिला-विश्वविद्यालयः कस्मिन् देशे आसीत् ?

(ख) सम्प्रति तक्षशिलायाः भग्नावशेषाः कुत्र सन्ति ?

(ग) मौर्यराज्यस्य संस्थापकः कः आसीत् ?

(घ) नालन्दा-विश्वविद्यालयस्य भाग्नावशेषाः कुत्र सन्ति ?

(ङ) केन आक्रमणेन नालन्दा-विश्वविद्यालयस्य विध्वंसो जातः ?

### 4. कोष्ठात् शब्दं चित्वा रिक्तस्थानम् पूरयत –

(क) षष्ठशतके ईस्वीपूर्वे ................ विश्वविद्यालयः अवर्तत ।

(नालन्दा, तक्षशिला)

(ख) नालन्दा विश्वविद्यालयः ................ एव आसीत्। (विहारे, उत्तरप्रदेशे)

(ग) कुमारगुप्तः ................ विश्वविद्यालयस्य स्थापनां कृतवान् ।

(विक्रमशिला, नालन्दा)

(घ) हुएनसांगः ................ देशस्य आसीत् । (अमेरिका, चीन)

(ङ) धर्मपालः ................ वंशीयः राजा आसीत् । (पाल, चोल)

### 5. निम्नलिखितानां शब्दानां प्रयोगेण संस्कृते वाक्यानि रचयत –

अभिधानम्, तक्षशिला, चन्द्रगुप्तः, हुएनसांगः, अध्यापकः ।

### 6. मेलनं कुरुत -

| | |
|---|---|
| (क) नालन्दाविश्वविद्यालयः | 1. मौर्यवंशः |
| (ख) हुएनसांगः | 2. विहारः |
| (ग) चन्द्रगुप्तः | 3. पालवंशः |
| (घ) तक्षशिलाविश्वविद्यालयः | 4. चीनी-यात्रिकः |
| (ङ) धर्मपालः | 5. गान्धारः |

### 7. रिक्तस्थानानि पूरयत -

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| (क) | पाठयति | पाठयतः | ................ |
| (ख) | लभते | .................. | ................ |
| (ग) | वर्तते | वर्तेते | ................. |
| (घ) | आसीत् | ................... | आसन् |
| (ङ) | अस्ति | .................... | .................. |

### 8. अधोलिखितानां पदानां सन्धिं सन्धिविच्छेदं वा कुरुत -

(क) इत्यादयः = ..........................................................

(ख) अस्य + अपि = ..........................................................

(ग) छात्राश्च = ..........................................................

(घ) तस्य + एव = ..........................................................

(ङ) अत्र + अनेके = ..........................................................

(च) यदि + अपि = ..........................................................

(छ) विकासोऽपि = ..........................................................

(ज) अत्रापि = ..........................................................

**9. प्रकृति-प्रत्यय-विभागं कुरुत -**

दीयते, जायते, लभन्ते, आसीत्, करोति, कृतः ।

**10. 'सत्यम्' अथवा 'असत्यम्' लिखत -**

**यथा** - विश्वविद्यालयाः ज्ञानकेन्द्राणि भवन्ति । 'सत्यम्'

(क) तक्षशिलाविश्वविद्यालयः गान्धारदेशे आसीत् ।

(ख) मौर्यराज्यस्य संस्थापकः धर्मपालः आसीत् ।

(ग) नालन्दाविश्वविद्यालयः पाकिस्तानदेशे आसीत् ।

(घ) विक्रमशिलाविश्वविद्यालयः धर्मपालेन संस्थापितः ।

(ङ) नालन्दाविश्वविद्यालयस्य बर्बराणाम् आक्रमणेन विध्वंसो जातः ।

**11. उदाहरणानुसारेण विभक्ति-वचन-निर्णयं कुरुत -**

| | | | विभक्तिः | वचनम् |
|---|---|---|---|---|
| **यथा** - | गृहेषु | | सप्तमी | बहुवचनम् |
| (क) | शास्त्राणाम् | - | .......................... | .......................... |
| (ख) | छात्रान् | - | .......................... | .......................... |
| (ग) | ज्ञानस्य | - | .......................... | .......................... |
| (घ) | भारते | - | .......................... | .......................... |
| (ङ) | देशस्य | - | .......................... | .......................... |
| (च) | वर्षाणि | - | .......................... | .......................... |
| (छ) | आक्रमणेन | - | .......................... | .......................... |
| (ज) | बर्बराणाम् | - | .......................... | .......................... |

## 12. हिन्दीभाषायाम् अनुवदत-

(क) तक्षशिलाविश्वविद्यालयः गान्धारदेशे आसीत् ।

(ख) नालन्दाविश्वविद्यालयस्य कुमारगुप्तेन स्थापना कृता ।

(ग) अत्र सुयोग्याः अध्यापकाः छात्रान् पाठयन्ति ।

(घ) तक्षशिलाविश्वविद्यालयः षष्ठशतके ईस्वीपूर्वमेव अवर्तत ।

(ङ) धर्मपालः पालवंशीयः राजा आसीत् ।

## योग्यता-विस्तारः

सभ्यता और संस्कृति की दृष्टि से विश्व में चार देश महत्त्वपूर्ण रहे थे जो आज भी अपने अतीत पर गौरवान्वित हैं। ये हैं – मिस्र, चीन, भारत तथा यूनान । इनमें भारत को 'विश्वगुरु' कहा जाता था क्योंकि यहाँ के प्रतिष्ठित विद्वानों ने अपनी प्रतिभा से विश्व के मानवों को आकृष्ट किया था । प्राचीन ऋषियों के आश्रम ही ज्ञान के केन्द्र नहीं थे अपितु कालान्तर में राजाश्रय से कुछ विद्यापीठों की स्थापना भी हुई । इनमें विविध विषयों के प्रतिभाशाली शिक्षक एवं दूर-दूर के ज्ञानार्थी निवास करते थे ।

इतिहास में सबसे पहला विद्यापीठ पंजाब (पाकिस्तानी पंजाब) की तक्षशिला में था । यहाँ उत्खनन से विद्यापीठ के अवशेष पाये गये हैं । यूनानी लेखकों ने भी इसकी चर्चा अपने विवरणों में की है । कहते हैं प्रसिद्ध आयुर्वेदज्ञ 'जीवक' तथा राजनीतिशास्त्री 'चाणक्य' ने यहीं शिक्षा प्राप्त की थी । जीवक के चमत्कारी कार्यों का वर्णन बौद्ध ग्रन्थों में, विशेष रूप से 'विनयपिटक' में मिलता है । चाणक्य को कौटिल्य या विष्णुगुप्त भी कहते थे । उनका अर्थशास्त्र संस्कृत राजशास्त्र का बहुत प्रामाणिक और महत्त्वपूर्ण ग्रन्थ है ।

वर्तमान भारतीय क्षेत्र में बिहार राज्य के दो प्राचीन विद्यापीठ बहुत विख्यात थे । चीन, तिब्बत इत्यादि देशों से मेधावी छात्र आकर यहाँ अध्ययन करते थे। नालन्दा विश्वविद्यालय के अवशेष 1860 ई. के दशक में उत्खनन से अनावृत हुए थे। इन्हें देखकर लोग चकित रह गये कि कितने योजनाबद्ध रूप में यहाँ आवासीय व्यवस्था की गयी थी । इसकी स्थापना पाँचवीं शताब्दी में हुई थी । चीन के तीन प्रसिद्ध यात्रियों ने इसका विवरण दिया है जो यहाँ आकर कई वर्षों तक अध्ययन के लिए रहे थे । फाह्यान चन्द्रगुप्त द्वितीय के काल में (प्राय: 400 ई.) आया था । उसके यात्राविवरण खण्डित रूप में मिले हैं । सबसे अधिक प्रभावशाली विवरण हुएनसांग ने दिया है जो पूरे भारत में घूमा था (629-643 ई.)। नालन्दा विश्वविद्यालय में दो बार आकर उसने सैकड़ों पुस्तकों की पाण्डुलिपियाँ बनाई और उन्हें वह चीन ले गया था । इत्सिंग (671 ई. के आसपास) ने नालन्दा में पढ़ाये जाने वाले विषयों का विशेष रूप से विवरण दिया है तथा शिक्षणपद्धति पर भी पर्याप्त प्रकाश डाला है । इन तीनों यात्रियों के कारण नालन्दा से तिब्बत और चीन का सांस्कृतिक आदान-प्रदान बहुत अधिक बढ़ा जो पाँच - छह सौ वर्षों तक चलता रहा। नालन्दा का विध्वंस 1200 ई. के आस-पास बख्तियार खिलजी की बर्बर सेना ने किया तथा यहाँ के पुस्तकालय जला दिये । इसका वर्णन तिब्बती यात्री "धर्मस्वामी" ने किया है।

नालन्दा विश्वविद्यालय के समकालीन भागलपुर के निकट विक्रमशिला विश्वविद्यालय भी सहयोगी के रूप में विकसित हुआ था । यहाँ भी बौद्ध धर्म तथा अन्य शास्त्रों का अध्ययन-अध्यापन होता था यद्यपि यह नालन्दा के समान व्यापक नहीं था। तिब्बती विवरणों में विक्रमशिला की तथा यहाँ के प्रसिद्ध विद्वानों की बहुत प्रशंसा की गयी है । इसका उत्खनन स्वतंत्र भारत में किया गया जिससे बहुमूल्य सामग्री प्राप्त हुई है ।

अष्टमः पाठः

# नीतिश्लोकाः

## ( कर्तृवाच्य, कर्मवाच्य )

(नीतिश्लोक जीवन को सुचारु रूप से चलाने की प्रेरणा देते हैं । संस्कृत में यद्यपि अनेक काव्यों में प्रसङ्गवश नीतिश्लोक आये हैं जैसे रामायण, महाभारत, पञ्चतन्त्र, कालिदास के काव्य आदि में। तथापि कुछ ऐसे संग्रहग्रन्थ हैं जहाँ केवल नीतिश्लोक ही संकलित हैं । जैसे नीतिशतक, चाणक्यनीतिदर्पण इत्यादि । चाणक्यनीतिदर्पण यद्यपि कूटनीतिज्ञ चाणक्य के नाम से प्रचलित है किन्तु यह अनेक कालों में रचे गये नीतिश्लोकों का संकलन है । इनकी भाषा अत्यन्त सरल है, लगभग बोलचाल की संस्कृत भाषा है । इस पाठ में इसी ग्रन्थ से श्लोक दिये गये हैं।)




1. कस्य दोषः कुले नास्ति व्याधिना के न पीडिताः ।
   व्यसनं केन न प्राप्तं कस्य सौख्यं निरन्तरम् ॥(3.1)
2. आचारः कुलमाख्याति देशमाख्याति भाषणम् ।
   सम्भ्रमः स्नेहमाख्याति वपुराख्याति भोजनम् ॥ (3.2)
3. अधमा धनमिच्छन्ति धनं मानं च मध्यमाः ।
   उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥ (8.1)

4. विद्वान् प्रशस्यते लोके विद्वान् सर्वत्र गौरवम् ।
विद्यया लभते सर्व विद्या सर्वत्र पूज्यते ।। (8.20)

5. दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं पिबेज्जलम् ।
शास्त्रपूतं वदेद्वाक्यं मन:पूतं समाचरेत् ।। (10.2)

6. अनित्यानि शरीराणि विभवो नैव शाश्वत: ।
नित्यं सन्निहितो मृत्यु: कर्त्तव्यो धर्मसंग्रह: ।। (12.12)

7. जलबिन्दुनिपातेन क्रमश: पूर्यते घट: ।
स हेतु: सर्वविद्यानां धर्मस्य च धनस्य च ।। (12.22)

8. यथा धेनुसहस्रेषु वत्सो गच्छति मातरम् ।
तथा यच्च कृतं कर्म कर्तारमनुगच्छति ।। (13.15)

## शब्दार्थ:

**कस्य** = किसका / की / के

**कुले** = वंश/ खानदान में

**व्याधिना** = रोग से

**केन** = किससे, किसके द्वारा

**सौख्यम्** = मित्रता, दोस्ती

**आचार:** = चाल-चलन

**कुलमाख्याति** (कुलम् + आख्याति) = वंश को बताता है

**सम्भ्रम :** = आदर, श्रद्धा, व्याकुलता

**वपु:** = शरीर

**अधमा:** = नीच लोग

| | | |
|---|---|---|
| **महताम्** | = | महान् व्यक्तियों का/ की/ के |
| **प्रशस्यते** | = | प्रशंसित होता है |
| **लोके** | = | संसार में |
| **गौरवम्** | = | महत्त्वपूर्ण |
| **पूज्यते** | = | पूजी जाती है |
| **अनित्यानि** | = | अस्थायी, अस्थिर |
| **विभवो ( विभवः )** | = | धन-सम्पत्ति, ऐश्वर्य |
| **शाश्वतः** | = | स्थायी, सदा रहने वाला |
| **सन्निहितो** (सन्निहितः) | = | समीप |
| **कर्त्तव्यो** (कर्त्तव्यः) | = | करने योग्य, करना चाहिए |
| **धर्मसंग्रहः** | = | धर्म का संचय, धार्मिक कार्य |
| **पूर्यते** | = | पूरा होता है, भरता है |
| **हेतुः** | = | कारण |
| **सर्वविद्यानाम्** | = | सभी विद्याओं का/ की/ के |
| **धेनुसहस्रेषु** | = | हजारों गायों में |
| **वत्सो ( वत्सः )** | = | बछड़ा |
| **मातरम्** | = | माता को, माँ के पास |
| **कृतम्** | = | किया गया |
| **कर्तारमनुगच्छति** (कर्तारम् + अनुगच्छति) | = | कर्ता के पीछे जाता है |

| | | |
|---|---|---|
| **दृष्टिपूतम्** | = | आँखों से पवित्र अर्थात् अच्छी तरह देखा गया |
| **न्यसेत्** | = | रखना चाहिए |
| **पादम्** | = | पैर |
| **वस्त्रपूतम्** | = | कपड़े से पवित्र किया हुआ अर्थात् छना हुआ |
| **पिबेज्जलम्** (पिबेत् + जलम्) | = | जल पीना चाहिए |
| **शास्त्रपूतम्** | = | शास्त्रों द्वारा पवित्र किया गया अर्थात् शास्त्रसम्मत |
| **मन:पूतम्** | = | मन से पावन किया गया अर्थात् मन से सोचा गया |
| **समाचरेत्** | = | आचरण करना चाहिए |

## व्याकरणम्

### सन्धिविच्छेद:/ पदविच्छेद:

| | | | |
|---|---|---|---|
| नास्ति | = | न + अस्ति | (दीर्घसन्धि:) |
| वपुराख्याति | = | वपु: + आख्याति | (विसर्गसन्धि:) |
| पिबेज्जलम् | = | पिबेत् + जलम् | (व्यञ्जनसन्धि:) |
| वदेद्वाक्यम् | = | वदेत् + वाक्यम् | (व्यञ्जनसन्धि:) |
| नैव | = | न + एव | (वृद्धिसन्धि:) |
| यच्च | = | यत् + च | (व्यञ्जनसन्धि:) |
| कुलमाख्याति | = | कुलम् + आख्याति | |
| देशमाख्याति | = | देशम् + आख्याति | |
| स्नेहमाख्याति | = | स्नेहम् + आख्याति | |
| कर्तारमनुगच्छति | = | कर्तारम् + अनुगच्छति | |

## प्रकृति-प्रत्यय-विभागः

| | | |
|---|---|---|
| आख्याति | = | आ + $\sqrt{\text{ख्या}}$ लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| इच्छन्ति | = | $\sqrt{\text{इष्}}$ , लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| प्रशस्यते | = | प्र + $\sqrt{\text{शंस्}}$ + यक् (कर्मवाच्यम्), प्रथमपुरुषः, एकवचनम् |
| लभते | = | $\sqrt{\text{लभ्}}$ आत्मनेपदम्, प्रथमपुरुषः, एकवचनम् |
| पूज्यते | = | $\sqrt{\text{पूज्}}$ +यक् (कर्मवाच्यम्), प्रथमपुरुषः, एकवचनम् |
| न्यसेत् | = | नि + $\sqrt{\text{अस्}}$ विधिलिङ्लकारः, प्रथमपुरुषः, एकवचनम् |
| पिबेत् | = | $\sqrt{\text{पा}}$ (पिब्), विधिलिङ्लकारः, प्रथमपुरुषः, एकवचनम् |
| वदेत् | = | $\sqrt{\text{वद्}}$ विधिलिङ्लकारः, प्रथमपुरुषः, एकवचनम् |
| समाचरेत् | = | सम् + आ +$\sqrt{\text{चर्}}$ , विधिलिङ्लकारः,प्रथमपुरुषः, एकवचनम् |
| कर्त्तव्यः | = | $\sqrt{\text{कृ}}$ + तव्यत्, पुंल्लिंगम्, एकवचनम् |
| पूर्यते | = | $\sqrt{\text{पृ}}$ + यक् (य) कर्मवाच्यम्, प्रथमपुरुषः, एकवचनम् |
| अनुगच्छति | = | अनु + $\sqrt{\text{गम्}}$ (गच्छ्) लट्लकारः, प्रथमपुरुषः, एकवचनम् |

## अभ्यासः

### मौखिकः

1. पाठे दत्तानां पद्यानां सस्वरवाचनं कुरुत ।

2. अधोलिखितानां पदानाम् अर्थं वदत –

   आख्याति, वपुः, इच्छन्ति, महताम्, अनित्यम्, निपातेन, अनुगच्छति, वत्सः ।

3. निम्नलिखितानां पदानां सन्धिविच्छेदं सन्धिं वा कुरुत –

   नैव, वपुराख्याति, पिबेज्जलम्, वदेद्वाक्यम्, यत् + च, न्यसेत् + पादम्

## लिखितः

**4. एकपदेन उत्तरत -**

(क) विद्वान् कुत्र प्रशस्यते ?

(ख) के धनम् इच्छन्ति ।

(ग) महतां धनं किमस्ति ?

(घ) धेनुसहस्रेषु वत्सः कुत्र गच्छति ?

(ङ) वस्त्रपूतं किं पिबेत् ?

**5. अधोलिखितेषु पदेषु प्रयुक्तां विभक्तिं वचनं च लिखत -**

| | पदानि | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा- | लोके | सप्तमी | एकवचनम् |
| | निपातेन | ................ | ................ |
| | धनस्य | ................ | ................ |
| | महताम् | ................ | ................ |
| | व्याधिना | ................ | ................ |
| | कुले | ................ | ................ |
| | मातरम् | ................ | ................ |
| | मानः | ................ | ................ |

6. **अधोलिखितानि पदानि प्रयुज्य वाक्यानि रचयत –**

विद्वान्, आख्याति, व्यसनम्, पूज्यते, घट:, वत्स:, लभते ।

7. **उचितकथनानां समक्षम् 'आम्', अनुचितकथनानां समक्षं 'न' इति लिखत–**

**यथा** – आचार: कुलं न आख्याति न

(क) विद्या सर्वत्र पूज्यते ।

(ख) दृष्टिपूतं पादं न न्यसेत् ।

(ग) सर्वे व्याधिना पीडिता: भवन्ति ।

(घ) अधमा: मानम् इच्छन्ति ।

(ङ) मध्यमा: केवलं धनम् इच्छन्ति ।

(च) शरीरम् अनित्यं भवति ।

8. **अधोलिखितानि पदानि निर्देशानुसारं परिवर्तयत –**

**यथा**– दोष: (षष्ठी – एकवचने) – दोषस्य

(क) विद्या (द्वितीया – द्विवचने) ..................................

(ख) विद्वान् (तृतीया – द्विवचने) ..................................

(ग) जलम् (सप्तमी – बहुवचने) ..................................

(घ) भोजनम् (चतुर्थी – एकवचने) ..................................

(ङ) माता (पञ्चमी – बहुवचने) ..................................

**9. अधोलिखितानां पदानां विलोमपदानि लिखत -**

दोषः, सौख्यम्, उत्थानम्, विद्या, मानम्, नित्यम्, अधमः

**10. लङ्लकारे परिवर्तनं कुरुत -**

| | लट्लकारः | | लङ्लकारः |
|---|---|---|---|
| यथा- | गजः धावति। | - | गजः अधावत्। |
| (क) | वत्सः दुग्धं पिबति। | - | ........................ । |
| (ख) | शरीरं नित्यं न अस्ति। | - | ........................ । |
| (ग) | दुग्धं श्वेतं भवति। | - | ........................ । |
| (घ) | सः विद्यालये पठति। | - | ........................ । |
| (ङ) | ते गृहं गच्छन्ति । | - | ........................ । |
| (च) | बालकौ हसतः। | - | ........................ । |
| (छ) | त्वं किं वदसि ? | - | ........................ ? |

**11. मञ्जूषातः पदं चित्वा रिक्तस्थानानि पूरयत -**

| अधमः, उत्तमः, मध्यमः, आचारः, कर्त्तव्यः, घटः, अनुगच्छति । |
|---|

(क) ..................... मानम् इच्छति ।

(ख) ..................... धनम् इच्छति ।

(ग) जलबिन्दुनिपातेन ..................... पूर्यते ।

(घ) त्वया धर्मसंग्रहः ..................... ।

(ङ) कृतं कर्म कर्तारम् ..................... ।

(च) ..................... धनं मानं च इच्छति ।

(छ) ..................... कुलम् आख्याति ।

## 12. वचनपरिवर्तनं कुरुत –

| | एकवचनम् | | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| (क) | गच्छति | – | ........................... | ......................... |
| (ख) | अभवत् | – | ........................... | ......................... |
| (ग) | अस्ति | – | ........................... | ......................... |
| (घ) | धनस्य | – | ........................... | ......................... |
| (ङ) | विद्या | – | ........................... | ......................... |
| (च) | धनाय | – | ........................... | ......................... |

## 13. समानार्थकानि पदानि मेलयत–

| | | | |
|---|---|---|---|
| (क) | विद्वान् | – | कारणम् |
| (ख) | वपुः | – | कुम्भः |
| (ग) | हेतुः | – | वित्तम् |
| (घ) | घटः | – | तोयम् |
| (ङ) | धनम् | – | शरीरम् |
| (च) | जलम् | – | विज्ञः |
| (छ) | गृहम् | – | हस्ती |
| (ज) | गजः | – | सदनम् |

## योग्यता-विस्तारः

### पाठ से सम्बद्ध

जीवन के संतुलित तथा बुद्धिमत्तापूर्वक संचालन के लिए नीति का महत्त्व है । नीति मानव को उन्नत करती है - नयति उन्नतिं नीतिः । प्रस्तुत पाठ में आचार्य चाणक्य के प्रसिद्ध ग्रन्थ से जो नीतिश्लोक लिए गये हैं उनमें बहुमूल्य जीवनदर्शन निहित है । उन्हें क्रमशः देखें -

**श्लोक 1 :** दु:ख के समय आश्वासन प्राप्त करना - कोई सदा सुखी नहीं रहता ।

**श्लोक 2 :** इसमें विभिन्न पदार्थों का कार्यकारण-सम्बन्ध दिया गया है । जैसे - आचरण देखकर किसी के वंश का ज्ञान, भाषा देखकर उसका मूलनिवासस्थान जानना, श्रद्धा देखकर स्नेह को समझना, शरीर देखकर किसी के खान-पान का अनुमान करना ।

**श्लोक 3 :** उत्तम, मध्यम, अधम व्यक्तियों का अन्तर उनकी कामना से प्रकट होता है कि वे धन या सम्मान या दोनों चाहते हैं ।

**श्लोक 4 :** विद्या और विद्वान् की महत्ता का निरूपण ।

**श्लोक 5 :** अपने दैनिक कार्यों में पवित्र करने वाले पदार्थों का परिचय । जैसे- पदविन्यास में दृष्टि का महत्त्व है तो आचरण में मन का महत्त्व है । पूत (पवित्र किया हुआ) का लक्ष्यार्थ सभी स्थितियों में पृथक्-पृथक् है। जैसे- दृष्टिपूत का अर्थ है- **ठीक से देखकर, वस्त्रपूत का अर्थ है**- कपड़े से छानकर, शास्त्रपूत का अर्थ-शास्त्र से विचार करके और मन:पूत का अर्थ है - मन में समझकर ।

**श्लोक 6 :** संसार की अनित्यता और धर्म की नित्यता का अन्तर यहाँ दिखाया गया है । महाभारत का एक श्लोक इस विषय में उदाहरण-योग्य है -

न जातु कामान् न भयान्न लोभात् ।
धर्मं त्यजेज्जीवितस्यापि हेतोः ॥

धर्मो नित्यः सुखदुःखे त्वनित्ये ।
जीवो नित्यः हेतुरस्य त्वनित्यः ।।

**श्लोक 7 :** धर्म और धन का संग्रह क्रमशः धैर्यपूर्वक होता है, उतावलेपन से नहीं ।

**श्लोक 8 :** कर्म का फल अवश्य मिलता है चाहे कोई कहीं भी हो ।

## व्याकरण से सम्बद्ध

यहाँ कुछ प्रमुख अव्ययों के अर्थ प्रयोगसहित अतिरिक्त ज्ञान के लिए दिये जाते हैं ।

## कालवाचक अव्यय

सर्वदा, निरन्तरम् = हमेशा, सदा। **छात्रः सर्वदा/निरन्तरं विद्याभ्यासं करोति।**

सम्प्रति, अधुना, इदानीम् = इस समय । **सम्प्रति / अधुना / इदानीं गृहं गन्तुं वयम् उत्सुकाः स्मः ।**

ह्यः = बीता हुआ कल । **ह्यः अस्माकं गृहे कः आगतः ?**

श्वः = आने वाला कल । **श्वः मम पिता नगरं गमिष्यति ।**

अद्य = आज । **अद्य कः दिनाङ्कः अस्ति ?**

सायम् = शाम । **सायम् उद्यानस्य भ्रमणं करणीयम् ।**

चिरम् = देर तक । **अध्यक्षः सभायां चिरं तिष्ठति ।**

कदा = कब (कस्मिन् काले)। **त्वं पाटलिपुत्रं कदा गमिष्यसि? बालकः कदा पुस्तकं पठति ?**

यदा, तदा = जब, तब । **यदा मेघः गर्जति तदा मयूरः नृत्यति ।**

ऐषमः = इस वर्ष (अस्मिन् वर्षे)। **ऐषमः वर्षा पर्याप्ता न आसीत् ।**

## प्रकारवाचक अव्यय :

शनैः, शनैःशनैः = धीरे-धीरे । **वृद्धः शनैः / शनैः शनैः चलति ।**

भूयः, मुहुः, पुनः = फिर । **शिक्षकः भूयः/ मुहुः / पुनः वर्गम् आगच्छति।**

मुहुर्मुहु ः = बार-बार (पुनः पुनः) । **मशकः मुहुर्मुहुः दशति ।**

यथा, तथा = जिस प्रकार, उसप्रकार । **त्वं यथा करोषि तथा फलं भवति ।**

कथम् = किस प्रकार, कैसे, क्यों । **त्वं कथं गमिष्यसि, यानेन पदातिः वा ?**

इत्थम्, एवम् = इस प्रकार (अनेन प्रकारेण) । **इत्थं शिक्षकः कथं मां ताडयति ? सः अस्मान् पाठयति ।**

सम्यक् = अच्छी तरह । **त्वं सम्यक् जानासि यत् अहं न गतः ।**

कदाचित् = कभी, शायद । **स कदाचित् अत्र आगतः आसीत् ।**

कदाचिदपि = कभी भी । **तत्र अहं कदाचिदपि न गतः ।**

QQQ

नवमः पाठः

# संकल्पवीरः दशरथ माँझी

## ( विशेषणों का प्रयोग )

(प्रस्तुत पाठ में बिहार के एक ऐसे कर्मवीर की रोमांचक कथा है जिसने अपने निरन्तर परिश्रम और दृढ़ संकल्पशक्ति से बाईस वर्षों तक एक ही प्रकार का काम करके 360 फुट लम्बी, 30 फुट चौड़ी और 25 फुट ऊँची पर्वत घाटी को काटकर ही विश्राम किया। अपनी पत्नी का मूलतः कष्टनिवारण के लिए उसने ऐसा किया किन्तु पूरे क्षेत्र के कल्याण का यह कार्य हो गया। अत्यन्त निर्धन और सामाजिक दृष्टि से निम्न वर्ग के दशरथ माँझी ने जो कार्य किया वह सभी लोगों के लिए अनुकरणीय है।)



जयन्ति कर्मवीरास्ते कृतभूरिपरिश्रमाः ।
सर्वेषामुपकाराय येषां संकल्पसिद्धयः ।।

दुर्बलकायः, स्वेदमुखः, रिक्तोदरः, कौपीनवसनः, कृषिकः ग्रामक्षेत्रेषु सर्वदा श्रमं करोति । ग्रामेषु प्रायेणार्थव्यवस्थायाः आधारः कृषिरेव वर्तते । किन्तु कृषिकाः आवश्यकवस्तूनि क्रेतुं निकटस्थान् हट्टान् आपणान् च गच्छन्ति । विहारप्रान्तस्य गयामण्डले उटजप्रधाने ग्रामे गहलौरनामके कश्चित् कृषिश्रमिकः न्यवसत् । तस्य नाम

दशरथ माँझी इत्यासीत् । अतीव परिश्रमी संकल्पवान् चासीत् । सः तस्य ग्रामः राजगीर-पर्वतमालायाः एकभागे अवर्तत । तस्य ग्रामस्य आपणस्थानं वजीरगंजे आसीत्। उभयोः स्थानयोः मध्ये पर्वतस्य संकीर्णः मार्गः बाधारूपः अभवत् । पदयात्रिकाः अपि भारेण सह तस्मिन् मार्गे चलितुं समर्थाः नासन् ।

ग्रामे यद्यपि सर्वे श्रमिकाः कृषिकाश्च तां बाधाम् अनुभूतवन्तः किन्तु केषामपि हृदये मार्गस्य विस्तारीकरणे नासीत् उत्साहः, न च संकल्पः । एकदा दशरथस्य पत्नी जलपूर्णं घटं नीत्वा तस्मिन् संकीर्णे मार्गे अगच्छत्, घटश्च भग्नो जातः। एतया घटनया दशरथस्य मानसे संकल्पः उत्पन्नः, मार्गमेतम् अहमेव विस्तीर्णं करिष्यामि । पर्वतस्य कठोरस्यापि अहंकारं विनाश्य जनहिताय विस्तीर्णं मार्गं निर्मास्यामि ।

अनेन संकल्पेन दशरथं प्रति ग्रामीणाः जनाः उपहासं कृतवन्तः । किन्तु निरक्षरोऽपि दशरथः दृढसंकल्पवान् जातः । यद्यपि स कुठारेण काष्ठानयनस्य कार्याणि कृत्वा क्षेत्राणां कर्षणं च कृत्वा जीवनं यापयति, तथापि तस्मात् दिवसात् प्रस्तरछेदनाय अपि उपकरणानि क्रीत्वा स स्वसंकल्पस्य पूरणे प्रवृत्तः । दिनानि व्यतीतानि, वर्षाणि च गतानि । शनैःशनैः अस्य श्रमिकस्य परिश्रमः प्रत्यक्षो जातः । द्वाविंशतिवर्षेषु एकः विस्तीर्णः मार्गः पर्वतमध्ये निर्मितः, नात्र कस्यापि शारीरिकः सहयोगः प्राप्तः । प्रस्तरखण्डानि भग्नानि । गहलौरात् वजीरगंजस्य मार्गः अल्पीभूतः । एतेषु वर्षेषु दशरथ माँझी बहून् सम्मानान् लब्धवान् । पर्वतमार्गश्च तस्य नाम्ना अभिहितः । ग्रामे प्रशासनेन तदनु सामुदायिकं भवनं निर्मितं चिकित्सालयश्च तस्य नाम्ना स्थापितः । राज्यप्रशासनं तस्मै **'पर्वतपुरुष'** इति सम्मानोपाधिम् अयच्छत् । दशरथस्य उदाहरणेन स्पष्टं भवति यत् कोऽपि जनः दृढेन संकल्पेन कठिनं किञ्च असम्भवमपि कार्यं कृत्वा यशो लभते । एतादृशाः कर्मवीराः एव समाजस्य वास्तविकाः सेवकाः ।

## शब्दार्थः

| | | |
|---|---|---|
| कृतभूरिपरिश्रमाः | = | जिन्होंने खूब परिश्रम किये हैं |
| सर्वेषाम् | = | सब का/ की / के |
| उपकाराय | = | उपकार के लिए |
| संकल्पसिद्धयः | = | संकल्पित कार्य के फल |
| दुर्बलकायः | = | दुबले शरीर वाला |
| स्वेदमुखः | = | पसीना युक्त मुँह |
| रिक्तोदरः | = | खाली पेट |
| कौपीनवसनः | = | लँगोटी धारण किये हुए |
| कृषिकः | = | किसान |
| ग्रामक्षेत्रेषु | = | ग्रामीण इलाकों में |
| क्रेतुम् | = | खरीदने हेतु |
| निकटस्थान् | = | समीप स्थित (को) |
| हट्टान् | = | हाटों को |
| आपणान् | = | दुकानों को |
| उटजप्रधाने | = | झोपड़ी बहुल |
| कृषिश्रमिकः | = | खेतिहर मजदूर |
| न्यवसत् | = | निवास करता था |
| संकीर्णः | = | सँकरा, तंग |

| | | |
|---|---|---|
| बाधारूपः | = | बाधा पहुँचाने वाला |
| पदयात्रिकाः | = | पदयात्री लोग, पैदल चलने वाले |
| चलितुम् | = | चलने में |
| अनुभूतवन्तः | = | अनुभव करते थे |
| विस्तारीकरणे | = | चौड़ा करने में |
| नीत्वा | = | लेकर |
| भग्नो ( भग्नः ) जातः | = | टूट गया |
| मानसे | = | मन में |
| मार्गमेतम् (मार्गम्+एतम्) | = | इस रास्ते को |
| अहमेव (अहम् + एव) | = | मैं ही |
| विनाश्य | = | नाश / समाप्त करके |
| निर्मास्यामि | = | बनाऊँगा, निर्माण करूँगा |
| उपहासम् | = | मजाक |
| दृढसंकल्पवान् | = | दृढ़ निश्चय वाला |
| काष्ठानयनस्य | = | लकड़ी ढोने का |
| कुठारेण | = | कुल्हाड़ी से |
| कर्षणम् | = | जुताई |
| क्षेत्राणाम् | = | खेतों का / की / के |
| यापयति | = | बिताता है |

| | | |
|---|---|---|
| प्रस्तरछेदनाय | = | पत्थर काटने के लिए |
| पूरणे | = | पूरा करने में |
| प्रवृत्तः | = | लग गया |
| व्यतीतानि | = | बिताये गये / बीत गये |
| गतानि | = | चले गये, बीते |
| अल्पीभूतः | = | छोटा हो गया |
| द्वाविंशतिवर्षेषु | = | बाइस वर्षों में |
| नाम्ना | = | नाम से |
| अभिहितः | = | पुकारा गया |
| तदनु | = | उसके बाद |
| अयच्छत् | = | दिया |
| किञ्च | = | इसके अतिरिक्त |
| एतादृशाः | = | इस प्रकार के |

## व्याकरणम्

### सन्धिविच्छेदः

| | | |
|---|---|---|
| कर्मवीरास्ते | = | कर्मवीराः + ते (विसर्ग-सन्धिः) |
| रिक्तोदरः | = | रिक्त + उदरः (गुण-सन्धिः) |
| प्रायेणार्थव्यवस्थायाः | = | प्रायेण + अर्थव्यवस्थायाः (दीर्घ-सन्धिः) |
| कृषिरेव | = | कृषिः + एव (विसर्ग-सन्धिः) |

| | | |
|---|---|---|
| इत्यासीत् | = | इति + आसीत् (यण्-सन्धिः) |
| चासीत् | = | च + आसीत् (दीर्घ-सन्धिः) |
| यद्यपि | = | यदि + अपि (यण्-सन्धिः) |
| नासन् | = | न + आसन् (दीर्घ-सन्धिः) |
| कृषिकाश्च | = | कृषिकाः + च (विसर्ग-सन्धिः) |
| कठोरस्यापि | = | कठोरस्य + अपि (दीर्घ- सन्धिः) |
| निरक्षरोऽपि | = | निः + अक्षरः + अपि (विसर्ग-सन्धिः) |
| काष्ठानयनस्य | = | काष्ठ + आनयनस्य (दीर्घ-सन्धिः) |
| तथापि | = | तथा + अपि (दीर्घ-सन्धिः) |
| कस्यापि | = | कस्य + अपि (दीर्घ-सन्धिः) |
| चिकित्सालयश्च | = | चिकित्सा + आलयः + च (दीर्घ-सन्धिः) |
| सम्मानोपाधिम् | = | सम्मान + उपाधिम् (गुण-सन्धिः) |

## प्रकृति-प्रत्यय-विभाग :

| | | |
|---|---|---|
| करोति | = | √कृ लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| वर्तते | = | √वृत् लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| क्रेतुम् | = | √क्री + तुमुन् |
| गच्छन्ति | = | √गम् लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| न्यवसत् | = | नि + √वस् लङ्लकारः, प्रथमपुरुषः, एकवचनम् |
| आसीत् | = | √अस् लङ्लकारः, प्रथमपुरुषः, एकवचनम् |

संकल्पवान् = संकल्प + मतुप्

अवर्तत = √वृत् लङ्लकार:, प्रथमपुरुष:, एकवचनम्

चलितुम् = √चल् + तुमुन्

अनुभूतवन्त: = अनु + √भू + क्तवतु, पुँल्लिङ्गम्, बहुवचनम्

नीत्वा = √नी + क्त्वा

अगच्छत् = √गम् लङ्लकार:, प्रथमपुरुष:, एकवचनम्

जात: = √जन् + क्त, पुं., एकवचनम्

करिष्यामि = √कृ लृट्लकार:, उत्तमपुरुष:, एकवचनम्

विनाश्य = वि + √नश् + णिच् + ल्यप्

निर्मास्यामि = निर् + √मा लृट्लकार:, उत्तमपुरुष:, एकवचनम्

कृतवन्त: = √कृ + क्तवतु, पुंल्लिङ्गम्, बहुवचनम्

कृत्वा = √कृ + क्त्वा

यापयति = √या + णिच्,पुगागम:,लट्लकार:,प्रथमपुरुष:,एकवचनम्

क्रीत्वा = √क्री + क्त्वा

प्रवृत्त: = प्र + √वृत् + क्त, पुंल्लिङ्गम्, एकवचनम्

गतानि = √गम् + क्त, नपुंसकलिङ्गम्, बहुवचनम्

निर्मित: = निर् + √मा + क्त, पुंल्लिङ्गम्, एकवचनम्

प्राप्त: = प्र + √आप् + क्त, पुंल्लिङ्गम्, एकवचनम्

लब्धवान् = √लभ् + क्तवतु, पुंल्लिङ्गम्, प्रथमपुरुष:, एकवचनम्

| | | |
|---|---|---|
| अभिहित: | = | अभि + √धा + क्त, पुंल्लिङ्गम्, एकवचनम् |
| स्थापित: | = | √स्था + णिच् + क्त, पुंल्लिङ्गम्, एकवचनम् |
| अयच्छत् | = | √दाण् (यच्छ्) लङ्लकार:, प्रथमपुरुष:, एकवचनम् |
| भवति | = | √भू लट्लकार:, प्रथमपुरुष:, एकवचनम् |
| लभते | = | √लभ् लट्लकार:, प्रथमपुरुष:, एकवचनम्, आत्मनेपदी |

## अभ्यास:

### मौखिक:

1. **अधोलिखितानां शब्दानाम् उच्चारणं कुरुत –**

   रिक्तोदर: आपणस्थानम्, इत्यासीत्, प्रायेणार्थव्यवस्थाया:, हट्टान्, निर्मास्यामि, द्वाविंशतिवर्षेषु, असम्भवमपि, सम्मानोपाधिम् ।

2. **कृषिकस्य विषये संस्कृतभाषायां द्वे वाक्ये वदत ।**

3. **निम्नलिखितानां शब्दानाम् अर्थं वदत –**

   हट्टान्, कौपीन:, स्वेद: आपणम्, चलितुम्, कर्षणम्, अयच्छत् ।

### लिखित :

4. **अधोलिखितानां प्रश्नानाम् उत्तरम् एकेन पदेन लिखत –**

   (क) अस्मिन् पाठे संकल्पवीर: क: ?

   (ख) सम्प्रति भारतवर्षे ग्रामीणक्षेत्रे अर्थव्यवस्थाया: मुख्याधार क: ?

   (ग) ग्रामीणक्षेत्रे कृषिका: आवश्यकवस्तूनि क्रेतुं कुत्र गच्छन्ति ?

   (घ) दशरथ माँझी कस्मिन् ग्रामे वसति स्म ?

   (ङ) राज्यप्रशासनं कस्मै 'पर्वतपुरुष' इति सम्मानोपाधिम् अयच्छत् ?

## 5. निम्नलिखितानां प्रश्नानाम् उत्तरं पूर्णवाक्येन लिखत –

(क) दशरथ माँझी कीदृशः आसीत् ?

(ख) दशरथ माँझी–महोदयस्य ग्रामः कुत्र स्थितः आसीत् ?

(ग) कयोः स्थानयोः मध्ये पर्वतस्य संकीर्णः मार्गः बाधारूपः आसीत् ?

(घ) कं प्रति ग्रामीणाः जनाः उपहासं कृतवन्तः ?

(ङ) दशरथस्य उदाहरणेन का शिक्षा मिलति ?

(च) कस्याः कष्टं दृष्ट्वा दशरथः संकल्पं कृतवान् ?

## 6. मञ्जूषायाः उचितपदानि चित्वा वाक्यानि पूरयत –

| |
|---|
| **वजीरगंजे, संकीर्णः, कृषिरेव, दशरथ माँझी, राजगीर पर्वतमालायाः, गहलौर, अल्पीभूतः** |

(क) ग्रामेषु प्रायेणार्थव्यवस्थायाः आधारः .......................... वर्तते ।

(ख) तस्य ग्रामस्य आपणस्थानं .......................... आसीत् ।

(ग) गहलौरात् वजीरगंजस्य मार्ग : .......................... ।

(घ) उभयोः स्थानयोः मध्ये पर्वतस्य .................... मार्गः बाधारूपः अभवत्।

(ङ) तस्य ग्रामः .......................... एकभागे अवर्तत ।

(च) उटजप्रधाने ग्रामे ..................... नामके कश्चित् कृषिश्रमिकः न्यवसत् ।

(छ) तस्य नाम .......................... इत्यासीत् ।

## 7. अधोलिखितेषु पदेषु प्रयुक्तां विभक्तिं वचनं च लिखत–

| | पदानि | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा– | क्षेत्रेषु | सप्तमी | बहुवचनम् |
| (क) | ग्रामेषु | ................... | ................... |

| | | | |
|---|---|---|---|
| (ख) | दुर्बलकाय: | .................... | .................... |
| (ग) | क्षेत्राणाम् | .................... | .................... |
| (घ) | तस्मात् | .................... | .................... |
| (ङ) | नाम्ना | .................... | .................... |
| (च) | तस्य | .................... | .................... |
| (छ) | पर्वतस्य | .................... | .................... |
| (ज) | तस्मिन् | .................... | .................... |

**8. अधोलिखितानि पदानि आधृत्य वाक्यानि रचयत -**

सर्वदा, कृषिक:, उभयो:, ग्रामेषु, अतीव ।

**9. सुमेलनं कुरुत -**

| | अ | आ |
|---|---|---|
| (क) | जात: | 1. $\sqrt{\text{नी}}$ + क्त्वा |
| (ख) | दृष्ट: | 2. $\sqrt{\text{जन्}}$ + क्त |
| (ग) | नीत्वा | 3. $\sqrt{\text{दृश्}}$ + क्त्वा |
| (घ) | क्रीत्वा | 4. $\sqrt{\text{गम्}}$ + क्त्वा |
| (ङ) | गत्वा | 5. $\sqrt{\text{दृश्}}$ + क्त |
| (च) | दृष्ट्वा | 6. $\sqrt{\text{क्री}}$ + क्त्वा |

**10. अधोलिखितानां पदानां सन्धिं सन्धिविच्छेदं वा कुरुत -**

(क) यदि + अपि = ........................................ ।

(ख) ............................ + .............................. = चासीत् ।

(ग) न + आसन् = ........................................ ।

(घ) ............................ + ........................... = रिक्तोदरः ।

(ङ) इति + आसीत् = ............................... ।

(च) ............................ + ........................... = कश्चित् ।

**11. वचन - परिवर्तनं कुरुत -**

| | एकवचनम् | | बहुवचनम् |
|---|---|---|---|
| **यथा-** | करोति | | कुर्वन्ति |
| (क) | गच्छति | - | ...................................... |
| (ख) | आसीत् | - | ...................................... |
| (ग) | वर्त्तते | - | ...................................... |
| (घ) | अगच्छत् | - | ...................................... |
| (ङ) | करिष्यामि | - | ...................................... |
| (च) | अकरोत् | - | ...................................... |
| (छ) | रक्षतु | - | ...................................... |
| (ज) | भवसि | - | ...................................... |

**12. उदाहरणानुसारं अव्ययपदानि चिनुत -**

**यथा** - दुर्बलकायः कृषिकः ग्रामक्षेत्रेषु सर्वदा श्रमं करोति । - सर्वदा

(क) ग्रामेषु अर्थव्यवस्थायाः आधारः प्रायेण कृषिः वर्त्तते । ........................

(ख) दशरथः परिश्रमी संकल्पवान् च आसीत् । ................................

(ग) शनैः शनैः अस्य श्रमिकस्य परिश्रमः प्रत्यक्षो जातः । ..................

(घ) एतादृशाः कर्मवीराः एव समाजस्य वास्तविकाः सेवकाः । ................

(ङ) यात्रिकाः अपि चलितुम् असमर्थाः आसन् । ..................

## योग्यता-विस्तारः

### पाठ से सम्बद्ध

भारत कृषिप्रधान देश रहा है । आज के अतिशय वैज्ञानिक युग में भी ग्रामीण अर्थव्यवस्था का मुख्य आधार कृषि ही है । कृषि अनेक उपादानों पर आश्रित होती है जैसे खेतिहर किसान (खेत का मालिक), भूमिरहित श्रमिक, हल-बैल (अथवा आज के युग में ट्रैक्टर), बीज, सिंचाई की व्यवस्था, वर्षा इत्यादि । मानव संसाधन की दृष्टि से सर्वाधिक महत्त्वपूर्ण स्थान उस श्रमिक या मजदूर का होता है जो सभी संकटों को सहते हुए खेतों में परिश्रम करता है, आवश्यकता से भी कम मजदूरी पर काम करता हुआ मौसम के उत्पातों को भी झेलता है । वह वस्तुतः कर्मवीर है । ऐसे ही कर्मवीर दशरथ मांझी थे । वे सामान्य मजदूरों के समान अज्ञात रह जाते यदि अपने संकल्प की दृढ़शक्ति से पर्वत काटकर अकेला ही एक लम्बी सड़क नहीं बना लेते । इस संकल्पवीर का नाम फिर तो अखबारों की सुर्खियों में आ गया । पहाड़ की संकीर्ण घाटी को 360 फुट लम्बाई, 30 फुट चौड़ाई और 25 फुट ऊँचाई में काटकर उन्होंने ऐसी सड़क का निर्माण किया जिसके लिए सरकारी योजना में करोड़ों खर्च होते । इस काम में दशरथ मांझी को अपनी जीविका के लिए मजदूरी करने से बचे हुए समय का उपयोग करना पड़ा और 22 वर्षों का लम्बा समय लगा । अपने सहयोगियों, ग्रामवासियों तथा संभ्रान्त लोगों का उपहास सह कर भी यह कर्मवीर अपने काम में लगा रहा । वह एक अनुकरणीय महापुरुष बन गया। कर्म से सफलता और यश पाने वालों में दशरथ मांझी अमर है ।

## व्याकरण से सम्बद्ध

### स्थानवाचक अव्यय

अत्र = यहाँ (अस्मिन् स्थाने)। **अत्र** पञ्च वृक्षाः सन्ति।

यत्र, तत्र = जहाँ, वहाँ। **यत्र** रामः अस्ति **तत्र** लक्ष्मणः अपि वर्तते।

यत्र – तत्र = जहाँ–तहाँ। अस्मिन् नगरे **यत्र–तत्र** उद्यानानि सन्ति।

कुत्र = कहाँ (कस्मिन् स्थाने)। तव माता **कुत्र** कार्यं करोति ?

सर्वत्र = सब जगह। भारते **सर्वत्र** शिक्षाप्रसारः दृश्यते।

बहिः = बाहर। ग्रामात् **बहिः** नदी वहति।

अन्तरा = बीच में। रामं लक्ष्मणं च **अन्तरा** सीता गच्छति।

अधः = नीचे। वृक्षस्य **अधः** कुटी वर्तते।

निकषा = निकट। विद्यालयं **निकषा** सरोवरः अस्ति।

अन्यत्र = दूसरी जगह। नगरात् **अन्यत्र** नास्ति काचित् सुविधा।

पुरः, पुरतः, अग्रे = सामने। गुरोः **पुरः** / **पुरतः** / **अग्रे** इदं कार्यं न शोभते।

### परिमाणवाचक अव्यय

किञ्चित् = कुछ। **किञ्चित्** अग्रे पश्य।

ईषत् = थोड़ा। अयं बालकः **ईषत्** रुग्णः वर्तते।

प्रकामं भृशम् = पर्याप्त, भरपूर। अस्मिन् वर्षे वर्षा **प्रकामं** / भृशं भवति।

कृतम्, अलम् = बस। **कृतं कृतं/अलम् अलं**, न अहम् अधिकं खादिष्यामि

## संयोजक अव्यय

| | | |
|---|---|---|
| च | = | और । इसका प्रयोग जुड़े हुए शब्दों के बाद होता है। |
| | | जैसे – रामः लक्ष्मणः **च** पठतः । |
| अपि | = | भी । अहम् **अपि** गमिष्यामि । |
| एव | = | ही । त्वम् **एव** मम कार्यं करिष्यसि । |
| वा | = | अथवा । सीता मन्दिरा **वा** गच्छतु । |
| परन्तु, किन्तु | = | लेकिन । यद्यपि सर्वे समानाः **किन्तु** मोहनः श्रेष्ठः । |
| अपितु, प्रत्युत | = | बल्कि । अयं न केवलः मेधावी, **अपितु** / **प्रत्युत** महान् परोपकारी । |

QQQ

## दशमः पाठः

# गुरु-शिष्य-संवादः

### ( संस्कृत का वाग्व्यवहार )

(प्रस्तुत पाठ में कक्षा के भीतर शिक्षक और छात्रों के संवाद के रूप में दो विषयों पर प्रकाश डाला गया है जिनमें पहला है विद्या का महत्त्व । विद्या को आधुनिक युग में शिक्षा के व्यापक परिवेश में लिया जाता है । दूसरी बात जो इस संवाद में अंकित की गयी है वह है किशोरों की मनोवृत्ति और उनका जीवन के प्रति स्वस्थ दृष्टिकोण । जीवन कौशल को विकसित करने के लिए उन्हें किन बातों पर ध्यान देना है, उन्हें यहाँ शिक्षक द्वारा बताया गया है । इस संवादात्मक पाठ का अभिनय भी लघु स्तर पर किया जा सकता है ।)



(अष्टमकक्षायाः दृश्यम्, आसनेषु स्थिताः बालकाः बालिकाश्च । पृष्ठभूमौ कृष्णपट्टः, समक्षं फलकम्, तस्योपरि मार्जनी पट्टलेखी च । शिक्षकस्य प्रवेशः, सर्वे छात्राः उत्तिष्ठन्ति ।)

**छात्राः** (समवेतस्वरेण) – प्रणमामो वयं सर्वे ।

**शिक्षकः** (दक्षिणं हस्तमुत्थाप्य) - तिष्ठन्तु सर्वे ।

**भावना** गुरुवर । अद्य किं पाठयिष्यति ?

**शिक्षकः** अद्य अनेकान् विषयान् कथयिष्यामि । आदौ विद्यायाः महत्त्वम् ।

**शीला** शोभनम् । विद्याविषये तु अस्माकमपि जिज्ञासा वर्तते ।

**शिक्षकः** तर्हि एवं प्राचीनं श्लोकं स्मरतु -

न चौरहार्यं न च राजहार्यं , न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं, विद्याधनं सर्वधनप्रधानम् ।।

**मोईनः** अयं तु अतीव प्रसिद्धः श्लोकः । धनानां सीमा वर्तते, विद्या तु असीमा । अपि किञ्चिदस्ति विद्याविषयकं सुभाषितम् ?

**शिक्षकः** बहूनि सन्ति । यथा - विद्ययाऽमृतमश्नुते, विद्या ददाति विनयम्, विद्याविहीनः पशुः इत्यादीनि । अपरमपि अद्य वदिष्यामि ।

**पंकजः** तत्रापि रोचकं किमपि कथयतु । वयं किशोराः स्मः । अस्माकं जीवनस्य लक्ष्यं वदतु भवान् ।

**शिक्षकः** यस्मिन् देशे समाजे च वयं निवसामः तं प्रति सर्वेषां किशोराणां कर्त्तव्यमस्ति । अस्याम् अवस्थायां स्वस्थम् आचरणं यदि भवेत् तदा सर्वत्र कल्याणं शान्तिः सुखं च प्रसरेयुः। कुत्रापि विषमताभावं न धारयेत् । यदपि शारीरिकं मानसिकं च परिवर्तनं किशोरावस्थायां भवति, तत् सर्वं प्राकृतिकमेव । अतः आश्चर्यं नास्ति ।

**वसुन्धरा** गुरुवर ! किशोरान् प्रति भवतः कः उपदेशः ?

**शिक्षकः** किशोराः अस्मिन् वयसि उद्विग्नाः भवन्ति, सर्वत्र शीघ्रतां कुर्वन्ति । तत् नास्ति उचितम् । सर्वं कार्यं कालेन भवति । ईर्ष्या, द्वेषः, लोभः, क्रोधः, अपशब्दानां प्रयोगः, आलस्यम् इत्येते सर्वे दोषाः सन्ति । अतः तेषां परित्यागेन किशोराः किशोर्यश्च विद्यायाः पात्राणि भवन्ति । अन्यथा सर्वम् अध्ययनं व्यर्थम् । अपि च येन कार्येण वयम् उद्विग्नाः भवामः तथा अपरान् प्रति न करणीयम् । उक्तञ्च –

पालनीयं तु सर्वत्र किशोरैरनुशासनम् ।
न क्रोधेन न लोभेन तेषामपि हितं भवेत् ।।
त्याज्यं च मादकं द्रव्यं त्यजेदपि कुसंगतिम् ।
पितरौ प्रणमेत् नित्यम् आद्रियेत गुरूनपि ।।
समाजस्योपकाराय कुर्याद् देशहिताय च ।
एवं कृते किशोराणां कल्याणं सार्वकालिकम् ।।

**छात्राः** अतीव कल्याणकरं वस्तु दर्शितं भवता ।

(छात्राः प्रमुदिताः प्रतीयन्ते । शिक्षकः वर्गात् निर्गच्छति ।)

## शब्दार्थः

| | | |
|---|---|---|
| **आसनेषु** | = | आसनों पर |
| **पृष्ठभूमौ** | = | पृष्ठभूमि में |
| **कृष्णपट्टः** | = | श्यामपट्ट (Blackboard) |
| **समक्षम्** | = | सामने |

| | | |
|---|---|---|
| **फलकम्** | = | टेबुल |
| **तस्योपरि** | = | उसके ऊपर |
| **मार्जनी** | = | डस्टर |
| **पट्टलेखी** | = | चॉक |
| **उत्तिष्ठन्ति** | = | उठते हैं |
| **समवेतस्वरेण** | = | एक स्वर से |
| **दक्षिणम्** | = | दायाँ |
| **हस्तमुत्थाप्य** (हस्तम् + उत्थाप्य) | = | हाथ उठाकर |
| **पाठयिष्यति** | = | पढ़ाएँगे |
| **कथयिष्यामि** | = | कहूँगा |
| **आदौ** | = | आरम्भ (शुरू) में |
| **शोभनम्** | = | अच्छा |
| **विद्याविषये** | = | विद्या के विषय में |
| **अस्माकमपि** (अस्माकम् + अपि) | = | हमलोगों का भी |
| **जिज्ञासा** | = | जानने की इच्छा |
| **तर्हि** | = | तो |
| **स्मरतु** | = | याद रखें |
| **चौरहार्यम्** | = | चोर द्वारा चुराने योग्य |

| | | |
|---|---|---|
| राजहार्यम् | = | राजा द्वारा छीनने योग्य |
| भ्रातृभाज्यम् | = | भाई द्वारा बाँटने योग्य |
| भारकारि | = | भार या बोझ देने वाला |
| व्यये कृते | = | खर्च करने पर |
| वर्धत एव | = | बढ़ता ही है |
| नित्यम् | = | हमेशा, सदा |
| विद्याधनम् | = | विद्यारूपी धन |
| सर्वधनप्रधानम् | = | सभी धनों में प्रधान |
| असीमा | = | असीमित |
| किञ्चित् | = | कुछ, कोई |
| विद्याविषयकम् | = | विद्या से सम्बन्धित |
| बहूनि | = | अनेक |
| विद्ययाऽमृतमश्नुते | = | विद्या से अमृत प्राप्त होता है (विद्यया + अमृतम् + अश्नुते) |
| विद्याविहीनः | = | विद्या से रहित |
| अपरम् | = | दूसरा, अन्य |
| वदिष्यामि | = | बोलूँगा |
| रोचकम् | = | रोचक, मनोरञ्जक |

| | | |
|---|---|---|
| **अस्माकम्** | = | हमलोगों का |
| **वदतु** | = | बोलो, बोलिए |
| **भवान्** | = | आप |
| **यस्मिन्** | = | जिसमें |
| **निवसाम:** | = | रहते हैं |
| **तम् प्रति** | = | उसके प्रति |
| **सर्वेषाम्** | = | सब का |
| **किशोराणाम्** | = | किशोरों का |
| **अस्याम् अवस्थायाम्** | = | इस अवस्था में |
| **प्रसरेत्** | = | फैलना चाहिए |
| **स्वपरिवारमेव** (स्वपरिवारम् + एव) | = | अपना परिवार ही |
| **कुत्रापि** (कुत्र + अपि) | = | कहीं |
| **विषमताभावम्** | = | भेदभावपूर्ण भाव |
| **धारयेत्** | = | धारण करना चाहिए |
| **यदपि** (यत् + अपि) | = | जो भी |
| **किशोरावस्थायाम्** | = | किशोरावस्था में |
| **किशोरान् प्रति** | = | किशोरों के प्रति |
| **भवत:** | = | आपका |

| | | |
|---|---|---|
| **अस्मिन्** | = | इसमें |
| **वयसि** | = | आयु में |
| **उद्विग्नाः** | = | उत्तेजित |
| **अपशब्दानाम्** | = | गालियों का |
| **परित्यागेन** | = | छोड़ देने से |
| **पात्राणि** | = | योग्य |
| **अपरान् प्रति** | = | दूसरे के प्रति |
| **करणीयम्** | = | करना चाहिए |
| **उक्तञ्च** (उक्तम् + च) | = | और कहा गया है |
| **पालनीयम्** | = | पालन करना चाहिए |
| **किशोरैः** | = | किशोरों द्वारा |
| **अनुशासनम्** | = | अनुशासन |
| **तेषामपि** (तेषाम् + अपि) | = | उनका भी |
| **हितम्** | = | हित, कल्याण |
| **भवेत्** | = | होना चाहिए |
| **त्याज्यम्** | = | छोड़ने योग्य |
| **मादकम्** | = | नशीला |
| **द्रव्यम्** | = | पदार्थ |

| | | |
|---|---|---|
| त्यजेत् | = | छोड़ देना चाहिए |
| कुसंगतिम् | = | बुरी संगत (साथ) को |
| पितरौ | = | माता-पिता को |
| प्रणमेत् | = | प्रणाम करना चाहिए |
| आद्रियेत | = | आदर करना चाहिए |
| गुरूनपि | = | गुरुओं को भी |
| समाजस्योपकाराय (समाजस्य + उपकाराय) | = | समाज के उपकार के लिए |
| कुर्याद् ( कुर्यात् ) | = | करना चाहिए |
| देशहिताय | = | देश के हित के लिए |
| एवं कृते | = | ऐसा करने पर |
| किशोराणाम् | = | किशोरों का |
| कल्याणम् | = | हित |
| सार्वकालिकम् | = | हमेशा, सदा रहने वाला |
| कल्याणकरम् | = | कल्याण करने वाला, हितकारी |
| दर्शितम् | = | दिखाया गया |
| भवता | = | आपके द्वारा |
| प्रमुदिताः | = | प्रसन्न, खुश |
| प्रतीयन्ते | = | प्रतीत होते हैं, लगते हैं |
| वर्गात् | = | कक्षा से, वर्ग से |
| निर्गच्छति | = | निकलता है |

# व्याकरणम्

## सन्धिविच्छेदः / पदविच्छेदः

| | | |
|---|---|---|
| बालिकाश्च | = | बालिकाः + च (विसर्गसन्धिः) |
| तस्योपरि | = | तस्य + उपरि (गुणसन्धिः) |
| हस्तमुत्थाप्य | = | हस्तम् + उत्थाप्य |
| किञ्चिदस्ति | = | किञ्चित् + अस्ति (व्यञ्जनसन्धिः) |
| विद्ययाऽमृतमश्नुते | = | विद्यया + अमृतम् + अश्नुते |
| अपरमपि | = | अपरम् + अपि |
| तत्रापि | = | तत्र + अपि (स्वरसन्धिः) |
| किमपि | = | किम् + अपि |
| कर्त्तव्यमस्ति | = | कर्त्तव्यम् + अस्ति |
| स्वपरिवारमेव | = | स्वपरिवारम् + एव |
| कुत्रापि | = | कुत्र + अपि (स्वरसन्धिः) |
| यदपि | = | यत् + अपि (व्यञ्जनसन्धिः) |
| किशोरावस्थायाम् | = | किशोर + अवस्थायाम् (स्वरसन्धिः) |
| प्राकृतिकमेव | = | प्राकृतिकम् + एव |
| नास्ति | = | न + अस्ति (दीर्घसन्धिः) |
| उद्विग्नाः | = | उत् + विग्नाः (व्यञ्जनसन्धिः) |
| इत्येते | = | इति + एते (स्वरसन्धिः) |

| | | |
|---|---|---|
| किशोर्यश्च | = | किशोर्यः + च (विसर्गसन्धिः) |
| किशोरैरनुशासनम् | = | किशोरैः + अनुशासनम् (विसर्गसन्धिः) |
| तेषामपि | = | तेषाम् + अपि |
| त्यजेदपि | = | त्यजेत् + अपि (व्यञ्जनसन्धिः) |
| गुरूनपि | = | गुरून् + अपि |
| समाजस्योपकाराय | = | समाजस्य + उपकाराय (गुणसन्धिः) |
| निर्गच्छति | = | निः + गच्छति (विसर्गसन्धिः) |

## प्रकृति-प्रत्यय-विभागः

| | | |
|---|---|---|
| दृश्यम् | = | √दृश् + यत्, नपुंसकलिङ्गम्, एकवचनम् |
| स्थिताः | = | √स्था + क्त स्त्री. / पुं. बहुवचनम् |
| उत्तिष्ठन्ति | = | उत् + √स्था लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| प्रणमामः | = | प्र + √नम् लट्लकारः, उत्तमपुरुषः, बहुवचनम् |
| उत्थाप्य | = | उत् + √स्था + ल्यप् |
| तिष्ठन्तु | = | √स्था लोट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| पाठयिष्यति | = | √पठ् णिच् (य्) लृट्लकारः, प्रथमपुरुषः, एकवचनम् |
| कथयिष्यामि | = | √कथ् लृट्लकारः, उत्तमपुरुषः, एकवचनम् |
| स्मरतु | = | √स्मृ लोट्लकारः, प्रथमपुरुषः, एकवचनम् |

| | | |
|---|---|---|
| हार्यम् | = | √हृ + ण्यत्, नपुंसकलिङ्गम्, एकवचनम् |
| भाज्यम् | = | √भञ्ज् + ण्यत्, नपुंसकलिङ्गम्, एकवचनम् |
| वर्धते | = | √वृध् आत्मनेपदी, प्रथमपुरुषः, एकवचनम् |
| सन्ति | = | √अस् लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| अश्नुते | = | √अश् लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| ददाति | = | √दा लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| वदिष्यामि | = | √वद् लृट्लकारः, उत्तमपुरुषः, एकवचनम् |
| कथयतु | = | √कथ् लट्लकारः, उत्तमपुरुषः, बहुवचनम् |
| स्मः | = | √अस् लट्लकारः, उत्तमपुरुषः, बहुवचनम् |
| वदतु | = | √वद् लोट्लकारः, प्रथमपुरुषः, एकवचनम् |
| निवसामः | = | नि + √वस् लट्लकारः, उत्तमपुरुषः, बहुवचनम् |
| कर्त्तव्यम् | = | √कृ + तव्यत्, नपुंसकलिङ्गम्, एकवचनम् |
| प्रसरेत् | = | प्र + √सृ विधिलिङ्लकारः, प्रथमपुरुषः, एकवचनम् |
| मन्येत | = | √मन् विधिलिङ्लकारः, प्रथमपुरुषः, एकवचनम् |
| धारयेत् | = | √धृ विधिलिङ्लकारः, प्रथमपुरुषः, एकवचनम् |
| कुर्वन्ति | = | √कृ लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| करणीयम् | = | √कृ + अनीयर्, नपुंसकलिङ्गम्, एकवचनम् |
| उक्तम् | = | √वच् + क्त, नपुंसकलिङ्गम्, एकवचनम् |

| | | |
|---|---|---|
| पालनीयम् | = | √पाल् + अनीयर्, नपुंसकलिङ्गम्, एकवचनम् |
| त्याज्यम् | = | √त्यज् + ण्यत्, प्रथमपुरुष:, एकवचनम् |
| प्रणमेत् | = | प्र + √नम् विधिलिङ्लकार:, प्रथमपुरुष:, एकवचनम् |
| आद्रियेत | = | आ + √दृ विधिलिङ्लकार:, प्रथमपुरुष:, एकवचनम् |
| कुर्यात् | = | √कृ विधिलिङ्लकार:, प्रथमपुरुष:, एकवचनम् |
| दर्शितम् | = | √दृश् + क्त नपुंसकलिङ्गम्, एकवचनम् |
| प्रमुदिता: | = | प्र + √मुद् + क्त, बहुवचनम् |
| प्रतीयन्ते | = | प्रति + √इङ् लट्लकार:, प्रथमपुरुष:, बहुवचनम् |
| निर्गच्छति | = | निर् + √गम् लट्लकार:, प्रथमपुरुष:, एकवचनम् |

## अभ्यास:

### मौखिक:

1. **अधोलिखितानां पदानाम् उच्चारणं कुरुत-**

पृष्ठभूमौ, समक्षम्, पट्टलेखी, हस्तमुत्थाप्य, जिज्ञासा, चौरहार्यम्, राजहार्यम्, भ्रातृभाज्यम्, सर्वधनप्रधानम्, किञ्चिदस्ति विद्ययाऽमृतमश्नुते, विद्याविहीन: इत्यादीनि, उद्विग्ना:, अपशब्दानां, किशोर्यश्च, उक्तञ्च, किशोरैरनुशासनम्, त्याज्यम्, कुसंगतिम्, गुरूनपि, समाजस्योपकाराय, सार्वकालिकम्, प्रमुदिता:, निर्गच्छति ।

2. **निम्नलिखितानां पदानाम् अर्थं वदत -**

कृष्णपट्ट:, समक्षम्, मार्जनी, हस्तमुत्थाप्य, चौरहार्यम्, राजहार्यम्, भ्रातृभाज्यम्, किञ्चित्, अपरम्, प्रसरेत्, विषमताभावम्, उद्विग्ना, अपशब्दानाम्, परित्यागेन, तेषामपि, त्याज्यम्, मादकम्, कुसंगतिम्, पितरौ, सार्वकालिकम्, प्रमुदिता: ।

## लिखित :

### 3. निम्नलिखितानां प्रश्नानाम् उत्तरम् एकपदेन लिखत –

(क) 'गुरुशिष्य-संवादः' इति पाठे कस्याः कक्षायाः दृश्यम् ?

(ख) बालकाः बालिकाश्च कुत्र स्थिताः?

(ग) शिक्षकः पाठेऽस्मिन् कस्याः महत्त्वं दर्शयति ?

(घ) किं न चौरहार्यं न राजहार्यं न भ्रातृभाज्यं वा वर्तते ?

(ङ) सर्वधनप्रधानं धनं किम् ?

(च) धनानां सीमा का?

(छ) विद्या किं ददाति ?

(ज) विद्याविहीनः जनः कीदृशः भवति ?

(ञ) किशोरावस्थायां किशोराः कीदृशाः भवन्ति ?

(ट) किशोरैः सर्वत्र किं पालनीयम् ?

(ठ) कौ नित्यं प्रणमेत् ?

(ड) शिक्षकः कस्मात् निर्गच्छति ?

### 4. अधोलिखितानां प्रश्नानाम् उत्तरं पूर्णवाक्येन लिखत–

(क) कक्षायां शिक्षकस्य प्रवेशे सति सर्वे छात्राः किं कुर्वन्ति ?

(ख) छात्राः समवेतस्वरेण किं वदन्ति ?

(ग) शिक्षकः कं हस्तम् उत्थाप्य वदति – तिष्ठन्तु सर्वे ।

(घ) शिक्षक: आदौ कस्या: महत्त्वं दर्शयति ?

(ङ) किशोरावस्थाया: के के दोषा: सन्ति ?

(च) केषां परित्यागेन किशोरा: किशोर्यश्च विद्याया: पात्राणि भवन्ति ?

(छ) येन कार्येण वयम् उद्विग्ना: भवाम: तथा कान् प्रति न करणीयम् ?

(ज) कौ नित्यं प्रणमेत् ?

(झ) कान् नित्यम् आद्रियेत ?

**5. मञ्जूषाया: उचितानि पदानि चित्वा वाक्यानि पूरयत-**

पृष्ठभूमौ, समक्षम्, विद्याधनम्, विनयम्, पशुसमान:, अनुशासनम्, कुसंगतिम्, त्याज्यम्, किशोरा:, प्राकृतिकम् ।

(क) कृष्णपट्ट: .............................. वर्तते ।

(ख) फलकं .............................. वर्तते ।

(ग) सर्वधनप्रधानं .............................. ।

(घ) विद्या ददाति .............................. ।

(ङ) विद्याविहीन: .............................. ।

(च) किशोरै: सर्वत्र .............................. पालनीयम् ।

(छ) .............................. त्यजेत् ।

(ज) मादकेन द्रव्येण .............................. उद्विग्ना भवन्ति ।

(झ) किशोरावस्थायां शारीरिकं मानसिकं च परिवर्तनं .......................... एव ।

## 6. निम्नलिखितानां पदानां बहुवचनं लिखत –

(क) उत्तिष्ठति ............................

(ख) तिष्ठतु ...............................

(ग) पाठयिष्यति .........................

(घ) कथयिष्यामि .......................

(ङ) स्मरतु ...............................

(च) वर्तते ...............................

(छ) वदिष्यामि .........................

(ज) भवति ..............................

(झ) करोति ............................

(ञ) निर्गच्छति ........................

## 7. पदानि योजयित्वा लिखत –

(क) अपरम् + अपि = ................................................

(ख) हस्तम् + उत्थाप्य = ................................................

(ग) अस्माकम् + अपि = ................................................

(घ) अपरम् + अपि = ................................................

(ङ) किम् + अपि = ................................................

(च) कर्तव्यम् + अस्ति = ................................................

(छ) स्वरपरिवारम् + एव = ........................................

(ज) प्राकृतिकम् + एव = ............................................

(झ) तेषाम् + अपि = ..................................................

(ञ) गुरून् + अपि = ..................................................

## 8. संस्कृते अनुवादं कुरुत –

(क) आज क्या पढ़ाएँगे ?

(ख) आरम्भ में विद्या का महत्त्व कहूँगा।

(ग) धन की सीमा होती है।

(घ) विद्या विनय देती है।

(ङ) विद्या से रहित व्यक्ति पशु के समान होता है।

(च) छात्र प्रसन्न प्रतीत होते हैं।

## 9. उदाहरणानुसारेण विभक्तिनिर्णयं कुरुत –

**यथा** – आसनेषु सप्तमी विभक्तिः

(क) बालकाः ................................................

(ख) पृष्ठभूमौ ................................................

(ग) शिक्षकस्य ................................................

(घ) अवस्थायाम् ................................................

(ङ) अस्मिन् ................................................

(च) पात्राणि ..............................................

(छ) किशोरैः ..............................................

(ज) गुरून् ..............................................

(झ) उपकाराय ..............................................

(ञ) शिक्षक : ..............................................

## 10. उदाहरणानुसारेण वचननिर्णयं कुरुत –

**यथा–** बालिकाः बहुवचनम्

(क) बालकाः ..............................................

(ख) श्लोकः ..............................................

(ग) पशुः ..............................................

(घ) किशोराः ..............................................

(ङ) पितरौ ..............................................

## 11. निम्नलिखितानां पदानां सन्धिं सन्धिविच्छेदं वा कुरुत –

(क) तस्य + उपरि ..............................................

(ख) ...................... + ....................... = तत्रापि

(ग) ....................... + ....................... = यदपि

(घ) उत् + विग्नाः ..............................................

(ङ) किशोर + अवस्था ..............................................

(च) किञ्चित् + अस्ति ..............................................

(छ)......................... + ...............................किशोरैरनुशासनम्

(ज) नि: + गच्छति ..............................................

## योग्यताविस्तार :

उपसर्गों के लगने से मूलशब्द या धातु के अर्थ में बहुत परिवर्तन होता है। संस्कृत का एक शब्द है - वाद । यह वद् धातु से घञ् प्रत्यय लगकर बना है । इसका इस दृष्टि से अर्थ है ''बोलना'' । यह मुख्यत: बातचीत करने के अर्थ में आता है । आधुनिक हिन्दी में ''मुकदमे'' के अर्थ में इसका प्रयोग देखा जाता है । इस शब्द के पूर्व कुछ उपसर्ग लगाएँ तो अर्थ परिवर्तन आवश्यक है । जैसे -

| | | |
|---|---|---|
| संवाद | = | दो या अधिक व्यक्तियों में कोई सार्थक वार्तालाप । |
| अनुवाद | = | एक भाषा से दूसरी भाषा में रूपान्तरण । |
| प्रवाद | = | किसी घटना या व्यक्ति के विषय में अफवाह । |
| परिवाद | = | किसी व्यक्ति के विरोध में शिकायत करना, निन्दा । |
| विवाद | = | झगड़ा, वाग्युद्ध |
| अपवाद | = | सामान्य विषय का विशेष स्थिति में विरोध । कभी-कभी यह अफवाह के अर्थ में भी होता है। |
| प्रतिवाद | = | विरोध |
| दुर्वाद | = | बुरा-भला कहना, निन्दा |

प्रस्तुत पाठ में गुरु और शिष्यों के बीच में कक्षा के अन्तर्गत दो विषयों को लेकर संवाद है। संवाद नाटक का एक महत्त्वपूर्ण तथा अनिवार्य अङ्ग है। ऋग्वेद में कई संवाद

मन्त्रों में निर्दिष्ट हैं, जैसे विश्वामित्र–नदी संवाद, सरमा–पणि संवाद, यम–यमी संवाद, उर्वशी–पुरूरवा संवाद इत्यादि। ये विभिन्न विषयों पर वार्तालाप के रूप में हैं । उपनिषदों में दार्शनिक ज्ञान से सम्बद्ध गुरु–शिष्य के बीच अनेक संवाद हैं । जैसे–कठोपनिषद् में यम–नचिकेता संवाद, बृहदारण्यकोपनिषद् में याज्ञवल्क्य–मैत्रेयी संवाद इत्यादि । संवादपद्धति से ही शिक्षण होता था । गुरु और शिष्य दोनों की सक्रियता संवाद में देखी जाती है फिर भी अनुशासन का महत्त्व तो है ही। प्रश्न ऐसे ही उठाए जायें जो विशुद्ध जिज्ञासा के सूचक हों। खिलवाड़ करने के लिए या किसी को तंग करने के लिए प्रश्न करना अशोभनीय है । ऐसी स्थिति से निपटने के लिए मनु ने कहा था –

नापृष्टः कस्यचिद् ब्रूयात् न चान्यायेन पृच्छतः ।
जानन्नपि हि मेधावी जडवल्लोकमाचरेत् ।।

अर्थात् बिना पूछे हुए कुछ नहीं बोलना चाहिए । अन्यायपूर्वक कोई पूछ रहा हो तो भी नहीं जवाब देना चाहिए। मेधावी को चाहिए कि जानते हुए भी इन स्थितियों में जड़ (मूर्ख) के समान संसार के प्रति व्यवहार करना चाहिए। इसलिए बातचीत के क्रम में अनुशासन की आवश्यकता बहुत अधिक होती है ।

इस प्रसंग में वाद से उत्पन्न होने वाले दो परिणामों की लोकोक्तियाँ दी गयी हैं –

1. वादे–वादे जायते तत्त्वबोधः (अच्छा परिणाम)
2. वादे–वादे जायते वै विवादः (कुत्सित परिणाम)

QQQ

## एकादशः पाठः

# विज्ञानस्य उपकरणानि

## (विभक्ति-प्रयोग)

(आज का युग वैज्ञानिक युग कहलाता है क्योंकि हजारों वर्षों में संसार ने उतनी प्रगति नहीं की थी जितनी प्रगति पिछले सौ वर्षों में हुई है । वैज्ञानिक उपकरणों के कारण सम्पूर्ण संसार एक ग्राम या एक परिवार जैसा हो गया है। इनके कारण कोई दूरी मानव के बीच नहीं रही। घर बैठे सम्पूर्ण संसार का चित्र ही नहीं देख सकते अपितु दूरस्थ व्यक्तियों से आमने-सामने बात भी कर सकते हैं । महीनों के काम कम्प्यूटर मिनटों में कर देता है । इन उपकरणों के आविष्कारकों तथा कार्य का ज्ञान देने वाला यह पाठ सामान्य ज्ञान की दिशा में उपयोगी है।)





अधुना वैज्ञानिकं युगं सर्वे अनुभवन्ति । अद्य मानवः तथैव नास्ति यथा शतं वर्षाणि पूर्वमासीत् । विज्ञानप्रभवाणि उपकरणानि सर्वेषां जीवने प्रविष्टानि सन्ति । नगरेषु वा ग्रामेषु वा सर्वे स्व-स्व-कार्येषु विज्ञानस्य साधनानि व्यवहरन्ति। आधुनिकानि वैज्ञानिकान्युपकरणाणि सर्वाण्यपि वैदेशिकैः जनैराविष्कृतानि सन्ति । रेलयानं सम्प्रति लोकप्रियं वाहनं दूरं गन्तुम् । देशे बहूनि रेलस्थानकानि वर्तन्ते । प्रथमं रेलचालकयन्त्रं जार्ज स्टीफेन्सनेन निर्मितमासीत् । एवमेव मुद्रणयन्त्रैः पुस्तकानि शीघ्रमेवासंख्यानि मुद्रितानि भवन्ति । कैक्सटनेन तस्य यन्त्रस्य आविष्कारेण संसारस्योपकारः कृतः । एडीसन नामकः आंग्लदेशीयो वैज्ञानिकः ग्रामोफोनस्य विद्युद्बल्बस्य चाविष्कारं



कृतवान् । विद्युतः उत्पादनाय डायनेमोनामकं यन्त्रमनिवार्यं वर्तते । तदाविष्काराय वयं माइकल फेराडे नामकं वैज्ञानिकं प्रति कृतज्ञाः । दूरस्थितानां वस्तूनां साक्षात्करणाय दूरबीन-नामकस्य उपकरणस्य आविष्कारम् इटलीदेशवासी गैलीलियो नामकः वैज्ञानिकः कृतवान् । रेडियो यन्त्रेण दूरस्थाः शब्दाः गृह्यन्ते । अस्य आविष्कारः इटलीवासिना मारकोनी महोदयेन कृतः । मोटरकारस्य आविष्काराय ऑस्टीनमहोदयः प्रसिद्धः। वायुयानम् अमेरिकावासिनौ राइटभ्रातरौ आविष्कृतवन्तौ ।







अधुना टेलीविजनयन्त्रं महदुपकारकं सिध्यति तेन गृहे स्थिताः वयं चित्राणि, पश्यामः चित्रस्थपात्राणां वचनानि च शृणुमः । जे.एल. वेयर्ड महोदयः अस्य यन्त्रस्य आविष्कारकः। तथैव कम्प्यूटरयन्त्रं लघुकायमपि गणनाकार्ये, श्रेणीकरणे, विश्लेषणे, तालिकादिनिर्माणे, मुद्रणे, स्मृतिसंग्रहणे च आधुनिकयुगे महदुपकारकं वर्तते । यद्यपि

भारतवर्षे बिलम्वेन समागतं किन्तु अस्य आविष्कारः 1946 वर्षे एव ब्रेनर्ड इंकटमैन्युली महोदयाभ्यां कृतः आसीत् । हेलीकाप्टरनामकं वायुयानं दुर्गमस्थलेष्वपि यानवाहनयोः कार्यं संचालयति । तस्याविष्कारः एटीन ओहमिसेन नामकेन वैज्ञानिकेन अभवत् । जी. ब्रैड शॉ महोदयः अत्युपयोगिनः स्कूटरयानस्य आविष्कारमकरोत् । डायनामाइट-नामकेन प्रभावशालिना चूर्णेन कठोराः पर्वताः अपि भज्यन्ते । तस्य आविष्कारम् अल्फ्रेड नोबल महोदयः स्वीडेन निवासी कृतवान् । तस्यैव नाम्ना तेन दत्तेन राशिना च विश्वप्रसिद्धः नोबलपुरस्कारः प्रदीयते ।

यद्यपि सहस्राधिकानां विज्ञानोपकरणानां प्रयोगः अहर्निशं भवति, नित्यं च नवीनानि आविष्क्रयन्ते सुविधार्थं जनानाम्। आयुर्विज्ञानस्य आविष्कारैः रोगाः दूरीक्रियन्ते जीवनावधिश्च जनानां वर्धितः। अत्र कानिचनैव उपकरणानि सूचितानि।

## शब्दार्थः

| | | |
|---|---|---|
| अधुना | = | आजकल |
| शतम् | = | सौ |
| विज्ञानप्रभवाणि | = | विज्ञान से उत्पन्न |
| प्रविष्टानि | = | प्रवेश किये हुए |
| वैदेशिकैः | = | विदेशियों द्वारा |
| सम्प्रति | = | आजकल |
| रेलस्थानकानि | = | रेल-स्टेशन |
| रेलचालकयन्त्रम् | = | रेल इंजन |
| विद्युद्बल्बस्य | = | बिजली-बल्ब का |

| | | |
|---|---|---|
| **विद्युतः** | = | बिजली का/ की/ के |
| **कृतज्ञाः** | = | किये गये उपकार को जानने वाले, ऋणी |
| **कृतवान्** | = | किया गया |
| **गृह्यन्ते** | = | ग्रहण किये जाते हैं |
| **कृतः** | = | किया |
| **आविष्कृतवन्तौ** | = | आविष्कार / खोज किये (द्विवचन) |
| **महदुपकारकम्** | = | बड़ा उपयोगी, महान उपकारक |
| **सिध्यति** | = | सिद्ध होता है |
| **चित्रस्थपात्राणाम्** | = | चित्र स्थित पात्रों/ व्यक्तियों का/ के/ की |
| **शृणुमः** | = | (हम) सुनते हैं |
| **लघुकायमपि** (लघुकायम् + अपि) | = | छोटा शरीर होने पर भी |
| **श्रेणीकरणे** | = | वर्गीकरण में |
| **स्मृतिसंग्रहणे** | = | याद करने योग्य (तथ्यों) को इकट्ठा करने में |
| **समागतम्** | = | आया |
| **यानवाहनयोः कार्यम्** | = | सवारी एवं माल–ढुलाई के काम को |
| **अत्युपयोगिनः** | = | अधिक उपयोगी (का/की/के) |
| **भज्यन्ते** | = | तोड़े जाते हैं |
| **तस्यैव** (तस्य + एव) | = | उसके ही |

| | | |
|---|---|---|
| **सहस्राधिकानाम्** | = | हजार से अधिक (का/ की/ के) |
| **अहर्निशम्** | = | दिन-रात |
| **आयुर्विज्ञानस्य** | = | चिकित्साशास्त्र का |
| **जीवनावधिश्च** | = | आयु, जीवनकाल |
| **कानिचनैव** (कानिचन + एव) | = | कुछ ही |
| **सूचितानि** | = | बताये गये (हैं) |

## व्याकरणम्

### सन्धिविच्छेदः/ पदविच्छेदः

| | | |
|---|---|---|
| तथैव | = | तथा + एव (वृद्धिसन्धिः) |
| नास्ति | = | न + अस्ति (दीर्घसन्धिः) |
| पूर्वमासीत् | = | पूर्वम् + आसीत् |
| वैज्ञानिकान्युपकरणानि | = | वैज्ञानिकानि + उपकरणानि (यण्सन्धिः) |
| सर्वाण्यपि | = | सर्वाणि + अपि (यण्सन्धिः) |
| जनैराविष्कृतानि | = | जनैः + आविष्कृतानि (विसर्गसन्धिः) |
| निर्मितमासीत् | = | निर्मितम् + आसीत् |
| एवमेव | = | एवम् + एव |
| शीघ्रमेवासंख्यानि | = | शीघ्रम् + एव + असंख्यानि (दीर्घसन्धिः) |
| संसारस्योपकारः | = | संसारस्य + उपकारः (गुणसन्धिः) |

| | | |
|---|---|---|
| चाविष्कारम् | = | च + आविष्कारम् (दीर्घसन्धिः) |
| यन्त्रमनिवार्यम् | = | यन्त्रम् + अनिवार्यम् |
| तदाविष्काराय | = | तत् + आविष्काराय (व्यञ्जनसन्धिः) |
| महदुपकारकम् | = | महत् + उपकारकम् (व्यञ्जनसन्धिः) |
| दुर्गमस्थलेष्वपि | = | दुर्गमस्थलेषु + अपि (यण्सन्धिः) |
| तस्याविष्कारः | = | तस्य + आविष्कारः (दीर्घसन्धिः) |
| अत्युपयोगिनः | = | अति + उपयोगिनः (यण्सन्धिः) |
| आविष्कारमकरोत् | = | आविष्कारम् + अकरोत् |
| तस्यैव | = | तस्य + एव (वृद्धिसन्धिः) |
| सहस्राधिकानाम् | = | सहस्र + अधिकानाम् (दीर्घसन्धिः) |
| विज्ञानोपकरणानाम् | = | विज्ञान + उपकरणानाम् (गुणसन्धिः) |
| अहर्निशम् | = | अहः + निशम् (विसर्गसन्धिः) |
| जीवनावधिश्च | = | जीवन + अवधिः + च (दीर्घसन्धिः, विसर्गसन्धिः) |

## प्रकृति-प्रत्यय-विभागः

| | | |
|---|---|---|
| अनुभवन्ति | = | अनु + √भू , लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| व्यवहरन्ति | = | वि + अव + √हृ, लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| गन्तुम् | = | √गम् + तुमुन् |
| आविष्कृतानि | = | आ + वि + √कृ , क्त, नपुंसकलिङ्गम्, बहुवचनम् |

| | | |
|---|---|---|
| कृतः | = | $\sqrt{\text{कृ}}$ , क्त, पुंल्लिंगम्, एकवचनम् |
| कृतवान् | = | $\sqrt{\text{कृ}}$ + क्तवतु, पुंल्लिंगम्, एकवचनम् |
| आविष्कृतवन्तौ | = | आ + वि + $\sqrt{\text{कृ}}$ + क्तवतु, पुंल्लिंगम्, द्विवचनम् |
| श्रृणुमः | = | $\sqrt{\text{श्रु}}$ , लट्लकारः, उत्तमपुरुषः, बहुवचनम् |
| भज्यन्ते | = | $\sqrt{\text{भज्}}$ , यक् (कर्मवाच्यम्) प्रथमपुरुषः, बहुवचनम् |
| प्रदीयते | = | प्र + $\sqrt{\text{दा}}$ + यक् (कर्मवाच्यम्) प्रथमपुरुषः, एकवचनम् |
| आविष्क्रियन्ते | = | आ + वि + $\sqrt{\text{कृ}}$, यक् (कर्मवाच्यम्) प्रथमपुरुषः, बहुवचनम् |
| संचालयति | = | सम् + $\sqrt{\text{चल्}}$ णिच्, लट्लकारः, प्रथमपुरुषः, एकवचनम् |

## अभ्यासः

### मौखिकः

1. **निम्नलिखितानां पदानाम् अर्थं वदत-**

अधुना, सम्प्रति, विज्ञानप्रभवाणि, गृह्यन्ते, लघुकायमपि, सहस्राधिकानाम्, आयुर्विज्ञानस्य, सिध्यति, समागतम्।

2. **निम्नलिखितानाम् उपकरणानाम् आविष्कारकाणां नामानि वदत-**

रेलचालकयन्त्रम्, विद्युद्बल्बः, दूरबीन, रेडियोयन्त्रम्, मोटरकारः, डायनामाइट

3. **निम्नलिखितानां धातुरूपाणां पाठं कुरुत-**

| | | |
|---|---|---|
| अकरोत् | अकुरुताम् | अकुर्वन् |
| अकरोः | अकुरुतम् | अकुरुत |
| अकरवम् | अकुर्व | अकुर्म |

## लिखितः

### 4. निम्नलिखितानां प्रश्नानाम् उत्तरम् एकपदेन लिखत –

(क) विद्युद्बल्बस्य आविष्कारः कः कृतवान् ?

(ख) कम्प्यूटरयन्त्रस्य आविष्कारः कस्मिन् वर्षे अभवत् ?

(ग) कस्य नाम्ना नोबेल–पुरस्कारः प्रदीयते ?

(घ) मोटरकारस्य आविष्कारं कः कृतवान् ?

(ङ) जी ब्रैड शॉ महोदयः कम् आविष्कारम् अकरोत् ?

### 5. पठितपाठमाश्रित्य निम्नलिखितानां प्रश्नानाम् उत्तरं लिखत –

(क) माइकलफेराडे नामकः वैज्ञानिकः कम् आविष्कारम् अकरोत् ?

(ख) दूरबीननामकस्य उपकरणस्य आविष्कारं कः कृतवान् ?

(ग) केन गृहे स्थिताः वयं चित्राणि पश्यामः ?

(घ) कम्प्यूटरयन्त्रस्य आविष्कारं कः कृतवान् ?

(ङ) हेलीकाप्टरनामकं वायुयानस्य आविष्कारं कः कृतवान् ?

(च) केन चूर्णेन कठोराः पर्वताः अपि भज्यन्ते ?

(छ) जे. एल. वेयर्ड महोदयः कस्य यन्त्रस्य आविष्कारं अकरोत् ?

### 6. लङ्लकारे परिवर्तनं कुरुत –

| | लट्लकारः | लङ्लकारः |
|---|---|---|
| यथा – | सः करोति | सः अकरोत् |
| (क) | अहं गच्छामि | ........................ |
| (ख) | त्वं पश्यसि | ........................ |

(ग) यूयं चलथ ........................

(घ) युवां मिलथः ........................

(ङ) के पश्यन्ति ........................

**7. मञ्जूषायाः उचितपदानि चित्वा वाक्यानि पूरयत-**

| |
|---|
| जार्ज स्टीफेन्सनेन, रेलस्थानकानि, महत्, एटीन-ओहमिसेन, रेडियो, डायनेमोयन्त्रम्, रोगाः |

(क) देशे बहूनि ................................ वर्त्तन्ते ।

(ख) रेलचालकयन्त्रं ................................ निर्मितमासीत् ।

(ग) विद्युतः उत्पादनाय ................................ अनिवार्यं वर्तते ।

(घ) अधुना टेलीविजनयन्त्रं ................................ उपकारकं सिध्यति ।

(ङ) हेलीकाप्टरनामकं वायुयानं .......................... नामकेन वैज्ञानिकेन कृतः ।

(च) ................................ यन्त्रेण दूरस्थाः शब्दाः गृहीयन्ते ।

(छ) आयुर्विज्ञानस्य आविष्कारैः ................................ दूरी क्रियन्ते ।

**8. उचितकथनानां समक्षम् 'आम्' अनुचितकथनानां समक्षं 'न' इति लिखत-**

**यथा** - विज्ञानप्रभवाणि उपकरणानि सर्वेषां जीवने प्रविष्टानि सन्ति । (आम्)

(क) गैलेलियो-नामकः वैज्ञानिकः इटली-देशवासी आसीत् । ( )

(ख) एडीसन-नामकः वैज्ञानिकः अपि इटली-देशवासी आसीत् । ( )

(ग) मोटरकारस्य आविष्कारं माइकलफेराडे कृतवान् । ( )

(घ) टेलीविजनयन्त्रस्य आविष्कारकः आस्टीन महोदयः आसीत्। ( )

(ङ) कम्प्यूटरयन्त्रस्य आविष्कारः 1946 वर्षे अभवत्। ( )

(च) स्कूटरयानस्य आविष्कारं जगदीशचन्द्रबोसमहोदयः अकरोत्। ( )

## 9. अर्थानुसारेण पदानि सुमेलयत –

| पद | अर्थ |
|---|---|
| (क) अधुना | सौ |
| (ख) शतम् | आया |
| (ग) कृतवान् | इस समय |
| (घ) अहर्निशम् | सिद्ध होता है |
| (ङ) समागतम् | उसके ही |
| (च) सिध्यति | बिजली का |
| (छ) विद्युतः | दिन–रात |
| (ज) तस्यैव | किया |

## 10. अधोलिखितानां पदानां सन्धिं सन्धिविच्छेदं वा कुरुत –

(क)......................... + ................................ नास्ति

(ख) अति + उपयोगिनः ................................

(ग) ......................... + .................................. तस्याविष्कारः

(घ) ......................... + .................................. अहर्निशम्

(ङ) एक + एकम् ......................................

(च) .......................... + ................................... तस्यैव

## 11. 'क्त' प्रत्ययस्य प्रयोगं कृत्वा त्रिषु लिङ्गेषु रूपाणि लिखन्तु

| | | पुँल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|---|
| यथा – | गम् + क्त | गतः | गता | गतम् |
| (क) | कृ + क्त | ................ | ................ | ................ |
| (ख) | दा + क्त | ................ | ................ | ................ |
| (ग) | चल् + क्त | ................ | ................ | ................ |
| (घ) | रक्ष् + क्त | ................ | ................ | ................ |
| (ङ) | पठ् + क्त | ................ | ................ | ................ |
| (च) | लिख् + क्त | ................ | ................ | ................ |
| (छ) | रक्ष् + क्त | ................ | ................ | ................ |
| (ज) | स्मृ + क्त | ................ | ................ | ................ |

## 12. अधोलिखितेषु अशुद्धानि पदानि शुद्धानि कृत्वा लिखत –

सूचितानी, अहर्निसम्, समृतिसंग्रहणे, श्रेनीकरणे सर्वान्यपि, आविस्कारम्, यन्त्रमनिवार्यम्, गृहयन्ते ।

Developed by: ABSOL www.absol.in

# योग्यता-विस्तारः

## पाठ से सम्बद्ध

आधुनिक विज्ञान में मानव जीवन में शीघ्रता, सुख-सुविधा इत्यादि लाकर बहुत बड़ा युगपरिवर्तन किया है । यद्यपि बहुत प्राचीन समय से कुछ देशों के लोग वैज्ञानिक अनुसन्धान में लगे हुए थे किन्तु औद्योगिक क्रांति विगत दो तीन सौ वर्षों की देन है जिसमें यूरोप तथा अमेरिका के वैज्ञानिकों ने अनेक उपकरणों का आविष्कार किया । बीसवीं शताब्दी में इस दिशा में बहुत तेजी से आविष्कार हुए । इसके फलस्वरूप हम घर बैठे या चलते-फिरते दूर के लोगों से बातें कर सकते हैं और उन्हें साक्षात् देख भी सकते हैं । मानव अन्तरिक्ष में पहुँच गया है । विभिन्न ग्रहों तक के आंकड़े मानवीय यानों के द्वारा संकलित किये गये हैं । चन्द्रमा पर भी मानव कई बार उतर चुका है । अनेक रोगों की चिकित्सा के साधन सुलभ हो गये हैं, नई-नई दवाओं की खोज हो रही है, स्वास्थ्य के प्रति जागरूकता आज बहुत अधिक हो गयी है, जिससे मनुष्य की आयु बढ़ चुकी है, मृत्युदर कम हो गयी है ।

कुछ वैज्ञानिक उपकरण ऐसे हैं जिनका हमारे दैनिक जीवन में निरन्तर उपयोग होता है । उनके आविष्कारकों के प्रति आभार प्रदर्शन करना तथा उन्हें जानना हमारा कर्तव्य है । इस पाठ में इस कार्यक्रम का संक्षिप्त क्रियान्वयन है। सामान्य ज्ञान की प्रामाणिक पुस्तकों से अतिरिक्त सूचनाएँ एकत्र की जा सकती है ।

## व्याकरण से सम्बद्ध

संख्यावाचक शब्द (51 से 75 तक) - संस्कृत के संख्यावाचक शब्द भारतीय भाषाओं में अपभ्रंश (तद्भव) रूप में आए हैं । छात्र-छात्राओं को अपनी भाषा के ऐसे शब्दों की तुलना संस्कृत मूल से करनी चाहिए और अन्तर की पहचान करनी चाहिए । यहाँ पच्चीस संख्यावाचक शब्दों के स्वरूप दिए जाते हैं । ये एकवचन तथा त्रिलिङ्गी

होते हैं । अत: तीनों लिङ्गों में अपने मूल स्वरूप को ही रखते हैं जैसे एकपञ्चाशत् बालका: / पुस्तकानि / बालिका: सन्ति। इसी प्रकार षष्टि: ग्रन्था: / पुष्पाणि / स्त्रिय: दृश्यन्ते । अन्य विभक्तियों में संख्यावाचक शब्द तो एकवचन रहता है किन्तु बोध्य शब्द किसी भी वचन में हो सकता है । जैसे – सप्तते: बालकानां प्रवेश: अस्मिन् सभाकक्षे जात: (इस हॉल में सत्तर लड़कों का प्रवेश हुआ)। अशीतौ कक्षासु अयं विद्यालय: चलति (यह विद्यालय अस्सी कमरों में चलता है)। ध्यान दें कि सप्तति या अशीति (संख्यावाचक शब्द) उन विभक्तियों में जाकर भी एकवचन ही हैं जबकि उनके विशेष्य वास्तविक वचनों को धारण कर रहे हैं ।

| | | |
|---|---|---|
| 51 | = | एकपञ्चाशत् |
| 52 | = | द्वापञ्चाशत् / द्विपञ्चाशत् |
| 53 | = | त्रय: पञ्चाशत् / त्रिपञ्चाशत् |
| 54 | = | चतु:पञ्चाशत् |
| 55 | = | पञ्चपञ्चाशत् |
| 56 | = | षट्पञ्चाशत् |
| 57 | = | सप्तपञ्चाशत् |
| 58 | = | अष्टापञ्चाशत् / अष्टपञ्चाशत् |
| 59 | = | नवपञ्चाशत् / एकोनषष्टि: |
| 60 | = | षष्टि: |
| 61 | = | एकषष्टि: |
| 62 | = | द्वाषष्टि: / द्विषष्टि: |

| | | |
|---|---|---|
| 63 | = | त्रय:षष्टि: / त्रिषष्टि: |
| 64 | = | चतुष्षष्टि: |
| 65 | = | पञ्चषष्टि: |
| 66 | = | षट्षष्टि: |
| 67 | = | सप्तषष्टि: |
| 68 | = | अष्टाषष्टि:/अष्टषष्टि: |
| 69 | = | नवषष्टि:/एकोनसप्तति: |
| 70 | = | सप्तति: |
| 71 | = | एकसप्तति: |
| 72 | = | द्वासप्तति: / द्विसप्तति: |
| 73 | = | त्रिसप्तति: / त्रयस्सप्तति: |
| 74 | = | चतु:सप्तति: |
| 75 | = | पञ्चसप्तति: |

QQQ